थगामिनि॥ धर्मद्रवीति विख्याते पापं मे हर जाह्नवी॥ तिस्रः कोट्योर्द्धकोटी च तीर्थानां वायु
रब्रवीत्॥ दिवि भुव्यंतरिक्षे च तानि ते संति जाह्नवी॥ नंदिनीत्येव ते नाम देवेषु नलिनी
ति च॥ वृंदा पृथ्वी च सुभगा विश्वकाया शिवासिता॥ विद्याधरी सुप्रसन्ना तथा लोकप्रसा
दनी॥ क्षेमा च जाह्नवी चैव शांता शांतिप्रदायिनी॥ एतानि पुण्यनामानि स्नानकाले
प्रकीर्त्तयेत्॥ भवेत्सान्निहिता तस्य गंगा त्रिपथगामिनी॥ सप्तवारानिजप्तेन करसंपुट
योजितं॥ मूर्ध्नि कुर्याज्जलं भूयः त्रिचतुःपंचसप्तवा॥ स्नानं कुर्यान्मृदा तद्वदामंत्र्य च वि
धानतः॥ अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे॥ मृत्तिके हर मे पापं यन्मया दुःकृतं
कृतं॥ उद्धृतासि वराहेण कृष्णेन शतबाहुना॥ नमस्ते सर्वलोकानां प्रभवारणि सुव्रते॥
=मादे स्नाने संध्यातर्पणादीनामिति शेषः॥ सप्तवारानिजप्तेत्यत्र वैदिकमूलमंत्रेण एक
वचननिर्देशात्॥ मूलमंत्रत्वनिर्देशस्य स्वार्थकत्वाच्च अनेनैवेभिर्मंत्रैरित्युपक्रमस्य कथि
तानां मूलमंत्राणां ग्राह्य इति क्रमः कार्यः। स्नानं कुर्यादिति आग्निम मंत्रेण मृदमानं अनतपागाग्रा

णपालस्यामज्जनं कुर्यादित्यर्थः ॥ अयं च स्नानविधिः सर्वशाखासाधारणः सर्ववर्णसाधारण
श्च संकोचे प्रमाणाभावात् ॥ पुराणश्रवणे सर्वाधिकारस्मरणाच्च ॥ अनधीतवेदं प्रति नायमेव स्नानवि
धिः प्रशस्तो वेदमंत्रशून्यत्वात् ॥ विष्णुः ॥ स्नात एव सोष्णीषे चाससी विभृयात् ॥ उष्णीषधार
२२ णं शिरोजलप्रच्यवार्थं ॥ आचमनात्प्राक् ॥ पाराशरः ॥ स्नानान्निरस्य वासोन्यज्जंघे प्रक्षा
लयेन्नरः ॥ योगियाज्ञवल्क्यः ॥ स्नात्वैवं वाससी धौते अक्लिष्टे परिधाय च ॥ प्रक्षाल्योरू मृ
दाद्भिश्च हस्तौ प्रक्षाल्य विधिवत् ॥ अभावे धौतवस्त्रस्य शाणक्षौमाविकानि च ॥ कुतपो योग
पट्टं च द्विवासा येन वै भवेत् ॥ कुतपो नेपालकंबलः ॥ जाबालिः ॥ नार्द्रमेकं च वसनं परिद
ध्यात्कथंचन ॥ अवसदातननिषेधबलात्पुरुषैर्धृता ॥ नरसिंहपुराणे ॥ नरस्तु कृ
ष्णं वासो न नीलं न प्रशस्यते ॥ मलाक्तं च दशाहीनं वर्जयेदंबरं बुधः ॥ ततः प्रक्षालयेत्पादौ
मृत्तोयेन विचक्षणः ॥ उत्तरीयमप्युक्तं ॥ एतच्चरलविशेषणं तेनात्यंतरमपीत्यर्थः ॥ उत्तरीयमं
चलमिति केचित् ॥ अत्र हारीतः ॥ न वासो विधुनुयात् नोत्तरीयपर्यासं कुर्यात् ॥ विष्णुः ॥
स्नातः शिरो नावधुनेत् नांगेभ्यस्तोयमुद्धरेत् ॥ न तैलवद्भिः संस्पृशेत् नाप्रक्षालितं पूर्वधृतं
वासो विभृयात् न म्लेच्छान्त्यजपतितैः सह संभाषणं कुर्यात् ॥ तैलं च वशान्ते तैलवद्भिः । राम २२
मार्कंडेयपुराणे ॥ संप्रमृज्यान्न स्नातो गात्राण्यंबरपाणिना । अंबरं स्नानवस्त्रं ॥ स्नान

साद्येतिविष्णुपुराणपाठात्॥ एवं चनस्नानोगात्रमवमृज्यादिति हारीतेपि स्नानसाद्यावप
रिणानान्तविशेषणीयः॥ एवं च सामर्थ्यप्रति मार्जनमात्राभावे असमर्थप्रतिपाणिसाटीमार्जना
भावइतिहरीहरोक्तमनवद्यं॥ सांख्यायनगृह्ये॥ आप्लुत्याप्युदकोन्यद्वस्त्रमाच्छादयेत्॥
अप्युदकोनुद्धृतोदकः॥ एवोपि पाणिवस्त्राभ्यामुद्धरणे निषेधः॥ कुलविशेषनिपतोवा
गृह्योक्तत्यागः॥ अत्र शंखः॥ उदकस्याप्रदानाद्धि स्नानसाटीनपीडयेत्। अत्रविष्णुः॥
यान्याद्रियातनं विष्णुः खं नित्यस्नायीनपश्यति॥ नित्यस्नानेनस्यपन्तेयेपि पापकृतोनराः॥
योगियाज्ञवल्क्यः॥ अगम्यागमनात्स्तेयात् पापेभ्यश्चप्रतिग्रहात्॥ रहस्याचरितात्पा
पान्मुच्यतेस्नानमाचरन्॥ पापेभ्यपातितत्त्वदिन्यः॥ छंदोगपरिशिष्टे॥ संध्यालोपस्यचा
कर्त्ता स्नानशीलश्चयःसदा॥ तं दोषानोपसर्पन्ति गरुत्मन्तमिवोरगाः॥ अथसंध्योपा
सनं॥ छंदोगपरिशिष्टे॥ अत ऊर्ध्वं प्रवक्ष्यामि संध्योपासनकं विधिं॥ अनर्हः कर्मणां
विप्रः संध्याहीनोयतः स्मृतः॥ संध्येति वरुणमारुणप्राणायामादिकर्मनाम॥ उपासनमनु
ष्ठानमितियावत्॥ आचाराः सेवतीत्यादौ दर्शनात्॥ अतएव संध्याकृता संध्योपासिते
तितुल्यवत्प्रयोगः॥ अथवोपासितासंध्याविष्णुना शंकरेणवा॥ कस्तांनोपासयेद्देवीमिति
संध्यारूपायाः देवतायाः
द्विकामोद्विजोत्तमः॥ इतियोगियाज्ञवल्क्येन देवीत्वेन कीर्त्तनात्।

वक्ष्यमाणप्राणायामादिना उपासनमाराधनं संध्योपासनं॥ मनुः॥ कर्मणामित्यादिना संध्यो
त्तरकर्मणि कृतसंध्यस्याधिकार इत्युक्तं॥ अथ नाचिरंतनसंध्यात्यागिनः पतितस्य द्विजातिक
र्माधिकारः। नानुतिष्ठति यः पूर्वां नोपास्ते यस्तु पश्चिमां। स शूद्रवद्बहिः कार्यः सर्वस्माद्द्विजक
२२ र्मणः इति मनुदर्शनात्॥ विष्णुपुराणे॥ सर्वकालमुपस्थानं संध्ययोः पार्थिवेष्यते॥ अन्यत्र
23 सूतिकाशौचविभ्रमातुरभीतितः॥ विभ्रमश्चित्तविक्षेपः मेघादिना कालाज्ञानमित्यन्ये। यत्र च
त्रमध्यान्हे संध्यानोक्ता तथापि एतत् संध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितं॥ यस्य नास्त्या
दरस्तत्र न स ब्राह्मण उच्यते इति छंदोगपरिशिष्टात्। संध्यात्रयं तु कर्त्तव्यं द्विजेनात्मविदा स
देति योगियाज्ञवल्क्यात्॥ अस्मिन्नपि वाक्यद्वये तेन संध्यात्रये नित्योऽधिकारो दर्शितः॥ पाप
क्षयकामाधिकारोप्यत्र यदाह याज्ञवल्क्यः॥ दिवा वा यदि वा रात्रौ यदज्ञानात्कृतं भवेत्॥ त्रि
कालसंध्याकरणात्तत्सर्वं विप्रणश्यति। सततं संध्यानिष्णातस्य फलांतरमप्याह। यमः॥
संध्यामुपासते ये तु सततं संशितव्रताः। विधूतपापास्ते यांति ब्रह्मलोकं सनातनं। संध्याद्वये
प्रत्येकमपि पापक्षयमाह। मनुः॥ पूर्वां संध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति। पश्चिमां तु समा कर्म
सीनो मलं हंति दिवाकृतं॥ नन्वेवं केवलमध्यान्हसंध्यायां किं प्रमाणं। मैवं उत्तरीयं धौते वाससी २२
परिधाय मद्दोरुकरौ प्रक्षाल्याचम्य त्रिराचम्यास्तन्निलादिकालापनेन मध्यान्हस्नानोत्तरं

नरसिंहपुराणादौ केवलाप्यानपि वस्तमारात्वात्॥ एवं संध्यात्रयेप्रत्येकमपि कर्त्तव्यतायादर्शितत्वात्॥
एकसंध्यालोपेऽपराऽपि न कर्त्तव्येति मिलतगोचरत्वादधिकारस्येति दुर्मतिः देशमाहतु॥
शंखलिखितौ॥ सव्रतीवहिः संध्यामुपासीत॥ सव्रती ब्रह्मचारी व्रतयुक्तो ध्ययनशीलचारात्
वहिर्ग्रामात्॥ नैनंग्रामेभिनिम्लोचेत्सूर्यो नाभ्युदयात्॥ क्वचिदिति मनुदर्शनात्। एनं ब्रह्मचारि
णमभिनिम्लोचेदिति अस्तं यायात्॥ गुणफलमाह॥ शातातपः॥ अनृतं मद्यगंधं च दिवा मैथु
नमेव च। पुनाति वृषलस्यान्नं वहिः संध्यामुपासिता। गृहेषु प्रकृति संध्या गोष्ठे शतगुणा
स्मृता॥ नदीषु शतसहस्रा अनंता शिवसन्निधौ। प्रकृतिरेकगुणा॥ व्यासः॥ वहिः संध्या
दशगुणा गोष्ठप्रस्रवणादिषु॥ शतं तीर्थे शतगुणा सहस्रा जाह्नवीजले॥ संध्याकालपरि
माणमाह॥ योगियाज्ञवल्क्यः॥ ह्रासवृद्धी सततं दिवसानां यथाक्रमं॥ संध्यामुहूर्त्तमाख्यात
ह्रासे वृद्धौ च सा स्मृता॥ सूर्यं तु प्रातःसंध्यासायंसंध्यान्यदंडद्वयमेव भवतीति। तथा संध्यो
संध्यामुपासीत नास्तगे नोद्गते रवौ॥ संध्याविति सवु विधानात्। नास्तंगतइति संधिस्तु परंतु
हृदीहृर्द्ध निषेधानुवादकं सतिसंभवेसादित्यमारभ्य पेवं परं वा॥ उपक्रमकालमाह॥
संवर्त्तः॥ प्रातःसंध्यां सनक्षत्रामुपासीत यथाविधि। सादित्यां पश्चिमां संध्यामर्द्धास्तमि
तिभास्करां॥ आदित्यपदमस्तमयमध्यस्पर्शबिंबपरं॥ समाप्तिकालमाह। याज्ञवल्क्यः॥

आ॰दं॰

जपंस्तासीतसावित्रीं प्रत्यगातारकोदयात्॥ संध्यांप्राक्प्रातरेवं हि तिष्ठेदादित्यदर्शनात्॥ प्रत्यक्पश्चिमा-
भिमुखः प्राक् सूर्याभिमुखैः आसीतेति सायं जपेन्नासीनत्वार्थं॥ तिष्ठेदिति प्रातर्जपऊर्ध्वत्वार्थं॥
मध्याह्ने संध्याजपेप्यूर्ध्वत्वमेव तिष्ठेदुदय नात्म वं मध्यमामपि शक्तितः इति छंदोगपरिशिष्टात्॥
स्नानोत्तरत्वेन मध्याह्नसंध्याप्रयोगे वोक्तं॥ मनुः॥ ऋषयो दीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुवन्॥
२४ प्रज्ञां यशश्च कीर्तिं च ब्रह्मवर्चसमेव च। दीर्घसंध्यत्वं प्रातरुदयावधि जपेत्॥ सायं च नक्षत्राव-
24 धि जपेत्॥ एवंगुणाफलमिति। वाक्यांतरेपि सूर्येन नक्षत्रपरेखावधित्वं फलार्थं॥ एकमूलत्वा-
नुरोधात्। अथवा सूर्यनक्षत्रयोः प्राक्कालोपि नित्यांगतया बोध्यते॥ नतु तत्कालस्य सावि-
त्रीजपेनाभिव्याप्तिरित्यत्रास्ति तात्पर्यं॥ उभयत्रापि कामनाविरहे विहितदशादिसंख्यादरः।
कामिनस्तु दीर्घसंध्यात्वरूपवशावगाज्जपेन कालप्राप्तावेव तात्पर्यं॥ अत्र च जपदीर्घत्वेन दीर्घ-
संध्याभिधानात् जपे न संध्याकाले समाप्तिरिति मंतव्यं॥ उभे संध्ये जपन् जप्यमुपासीत यथा-
विधिर्भीतादिनम्रवाक्येषु सावित्रीजपस्य संध्यांतर्गमः स्फुटः॥ एवमजपे प्रत्यवायश्रवणात् हानि
प्रायः फलमुक्तेति सावित्रीजपः पृथगपीति। अघमर्षणसूक्तस्यापो हि ष्ठेति। ऋतनस्य द्रुपदास्त्र राम
ऋष्यादिकमुक्त्वा योगियाज्ञवल्क्यः॥ एवं ज्ञात्वा तु मंत्राणां प्रयोगं वेद द्विजोत्तमः॥ संध्यामुपा २४
सपोद्वयधायावत्तान्निबोधत॥ अत्राहुः॥ सर्वेषामेव मंत्राणामादौ ऋष्यादिकं स्मर्तव्या

पश्चात्संध्याप्रयोगः ॥ तदप्युक्तं ॥ एवं संगमेनेन ऋष्यादिस्मरणेन सह सर्वेषां मंत्राणां नानन्तर्यं न्या-
यागतं बाधेत ॥ ओंकारस्य व्याहृतीनां गायत्र्याः शिरसश्च ऋष्यादिकं स्थानांतरे योगियाज्ञवल्क्ये
न कथितमिति कथं च न तत्सर्वभावः ॥ किं च ॥ अघमर्षणस्यापि ऋष्यादिकं प्रथममुक्तं
तदेव प्रथमं स्यात् ॥ तस्मात् ज्ञात्वेति प्रयोगाद्बहिर्ज्ञाने प्रयोगकालसौकर्यार्थं अथवा ज्ञात्वो-
पासयेदिति प्रत्येकमभिसंबध्यते ॥ तेन तत्र मंत्रस्य ऋष्यादिकं तत्तन्मंत्रप्रयोगात् प्राक् ज्ञा-
तव्यमिति सिध्यति ॥ प्रणवव्याहृतिसावित्रीशिरसां वमिलितानामेव प्राणायामे विनि-
योग इति ॥ तेषां मिलितानामेव ऋष्यादिकं स्मृत्वा प्राणायामः ॥ ओंकारस्यैतवर्ती
कथनं सावित्र्याश्चाग्निर्दुरवकथनं स्मृतिः विनियोगाभावात् ॥ आर्षं छंदश्च दैवतं
विनियोगस्तथैव च ॥ वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः इत्यादिना नानास्थानेषु च-
तुर्णामेवाभिधानात् ॥ अपत्र ऋष्यादिस्मरणे पाधिक एव क्रमो न्याय्यः ॥ स्थानांतरेष्व-
प्यनेनैव क्रमेण ऋष्यादिचतुष्ककथनं ॥ एवं च विनियोगजपकालेष्वनुस्मरेत् होमे
चांतर्डीले योगेस्त्वाध्याये याज्ञवल्क्येन तथेति ब्राह्मणांतरभावेन पंचविधत्वप्रकारांतरं ॥ अ
चिकफलार्थं वा ॥ इदं च ऋष्यादिस्मरणं यत्र मंत्रे प्रमाणितं ततः प्राक्प्रयोग एकैकत्वं ॥
संध्योपक्रमेऽभ्यासः ॥ स्मृत्वोंकारं च गायत्रीं निबध्नीयात् शिखां ततः ॥ पुनराचम्य हृदयं
नाभिं स्कंधौ च संस्पृशेत् ॥ यद्यस्मिन् काले मुक्तशिखः स्यात् तदानेन मंत्रेण शिखां बध्वाचमे

दित्यर्थः। ननु समंत्रकाचार्यं सर्वत्रापि शिखामोचनीयेति भ्रमः कार्यः॥ छंदोगपरिशिष्टे॥
सव्ये पाणौ कुशान्कृत्वा कुर्यादाचमनक्रियां॥ सव्यः सोपग्रहः कार्यो दक्षिणः सपवित्रकः॥ सोपग्र
ह इति कुशान्तरकलितेति सर्वोक्तकुशत्रयसमीपे अग्निमकर्मोपयुक्ताः कुशा भवन्त्वा इत्युक्तं तत्र
२५ कुशस्याकांक्षितत्वादुपग्र एतदनुपग्रह इति व्युत्पत्तिसंभवात्। अनंतर्गर्भिणं साग्रं कौशं
25 द्विदलमेव च प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥ अनेनैव लक्षितं॥ द्रस्थाः प्रचुरशीपा
सुकुशादीर्घाः स्युर्बर्हिषः॥ दर्भाः पवित्रमित्युक्तमतः संध्यादिकर्मणि॥ अस्यायमर्थः॥ यतः
प्रचरणे दोक्रस्थादिविधिस्ततः संध्यादौ विशेषविध्यभावाद्दर्भमात्रमेवांगं॥ ननु पवित्र
लक्षणमेतत्सर्वं लक्षणाबाधात्॥ अत इत्यन्वपाद्वाक्येनेतापचोः॥ अत एव आचम
नात्प्रागेव पवित्रधारणं॥ आचम्य प्रयतो नित्यं पवित्रेण द्विजोत्तमः॥ नोच्छिष्टं तत्
भवेत्तत्र भुक्तशेषं तु वर्जयेत् इति लघुहारीतदर्शनात्॥ अग्निमजाप्योपयुक्तकुश
स्य धारणमपि दक्षिणकरे पवित्रधारणावसर एव कुर्वंति॥ अपविरुद्धं चैतत्॥
लघुहारीतः॥ दर्भहीनं तु या संध्या यच्च दानं विनोदकं॥ असंख्यातं च यज्जप्तं तत्सर्वं
निःफलं भवेत्॥ योगियाज्ञवल्क्यः॥ ऐशान्याभिमुखो भूत्वा स्तु चिः प्रयतमानसः॥ राम २५
अपवांतं पुनराचामेद्दत्तमित्यपि मंत्रम्। अंतरं तु ध्यात्वेव मन्नपानमलीकृतं॥
तथा शृव्वो संध्यां तु गायत्री सवि

त्रीमध्यमास्मृता ॥ यौवे पश्चिमासंध्यासा तु देवी सरस्वती ॥ रक्ता भवति गायत्री सावित्री शुक्लवर्णि
का ॥ कृष्णा सरस्वती ज्ञेया संध्यात्रयमुदाहृतं ॥ कामधेन्वादिस्थैं ता भवति गायत्री सावित्री रक्तवर्णि
केति पाठः ॥ एतत्संध्यारूपवाचनं ध्यानार्थं स्मृतिमात्रपरं वा ॥ गायत्रीकालत्रयेपि शुक्लवर्णैव ध्येये
ति वक्ष्यते ॥ यासंध्या सावित्री सा च गायत्री त्रिधाभूता व्यवस्थितेति अस्य ध्यानं स्मृतिः ॥ परमा
र्थिके प्यभेदे जपोपक्रमे शुक्लायाएव ध्यानं ॥ बृहस्पतिः ॥ बद्ध्वासनं नियम्याक्षं [illegible] दिक्
ततः ॥ संनिमीलितदृङ्मौनी प्राणायामान् समभ्यसेत् ॥ आसनं पद्ममर्धासनं वापि तथा स्वस्तिक
कमानसमिति वा ऊर्ध्वपुराणोक्तं ॥ स्वमात्मनं नियम्यास्त्रेति पाठ प्राणायामपदं मंत्रपरं ॥ अत्र
छंदोगपरिशिष्टे वक्ष्यते ॥ रक्षां तेवारिणात्मानं परिक्षिप्य समंततः ॥ रक्षाकार्येति शेषः ॥ अंत
शब्दस्याद्यवपि शक्तत्वात् शिष्टाचारानुरोधात् ॥ प्राणायामादावियं रक्षा कार्येत्यर्थः ॥ कात्याय
नेन तु प्राणायामानंतरमेव लिखितं ॥ शंखवसिष्ठांगिरोबृहस्पतिपैठीनसिकौथायनः ॥
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥ व्याहृतीं च
छंदोगपरिशिष्टे ॥ भूराद्यास्तिस्र एवैता महाव्याहृतयोऽव्ययाः ॥ महर्जनस्तपः सत्यं गायत्री च
शिरस्तथा ॥ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोमिति शिरः ॥ प्रतिप्रतीकं प्रणवमुच्चा
रयेदंते च शिरसः ॥ एता एतां सहानेन तथैभिर्दशभिः सह ॥ त्रिः पठेदायतप्राणः प्राणायामः स उ
च्यते ॥ प्रतिप्रतीकं सप्तव्याहृतीनां गायत्र्याः शिरसश्चाद्यविमर्शः ॥ एवं शिरोंते प्रणवमादायदश
भवंति ॥ एता महाव्याहृतीः एतां गायत्रीं अनेन शिरसा एभिः प्रणवैः आयतप्राणः नियतवातः ॥

नियमश्च पूरके आदानमेव। कुंभके धारणमेव। रेचके त्याग एवेत्येवंरूपं॥ पूरकरेचककुंभकैः
प्राणायामस्त्रिलक्षणो ज्ञेयः त्रिलक्षणस्त्रिविधः॥ एतच्च योगियाज्ञवल्क्य एवं पौर्वापर्यपरामर्शो
२६ ध्यायते॥ एवं च प्रत्येकमेव प्राणायामत्वो लक्षप्रत्येकमेव। त्रिरावर्त्तीम प्रपाठः॥ एतावतैव प्राणायाम
26 प्रयासिद्धिरित आत एव ततोतः स्त्रुध्यति॥ त्रिभिरित्युपसंहारः॥ आदानरोधनोत्सर्गवायोः। त्रि
भिः समभ्यसेदिति व्यासेनोक्तो नवधाभ्यासः पश्चात्तरं त्रिविधं केचिदिच्छन्ति तथैव नवधा परे
इत्यनेनाप्यभिधानात्। तथाहि। नासिकाकृष्ट उच्छ्वासो ध्मातः पूरक उच्यते। कुंभको निश्च
लश्वासो रेच्यमानस्तु रेचकः॥ नीलोत्पलदलश्यामं नाभिदेशे प्रतिष्ठितं॥ चतुर्भुजं महात्मानं पूरके
नैव चिंतयेत्॥ कुंभकेन हृदिस्थाने ध्यायेच्च कमलासनं॥ ब्रह्माणं रक्तगौरांगं चतुर्वक्त्रं पितामहं॥ रेच
केनेश्वरं ध्यायेल्ललाटस्थं महेश्वरं॥ शुद्धस्फटिकसंकाशं निर्मलं पापनाशनं॥ पूरकेनेलादेवत्व
तीयासम्प्रम्यर्थे॥ कालोपलत्वारात्वात् गौरस वोगपाठे गौरपदं रक्तपदं नानार्थत्वात्॥ तथा
व्यासः॥ रक्तं प्रजापतिं ध्यायेदिति मात्रानेदान्मत्तुमध्योत्तमत्वं योगि प्राणायामविषयं संध्याप्र
णायामकालस्यमंत्रपाठे नैवावृष्ठेदात्॥ पूरकरेचककुंभकमिलितैकः प्राणायामः॥ कुंभकमात्र
एव तु मंत्रपाठ इत्याद्यसत्त्वन्निराष्टुं देगान्हेतुसंध्येयः॥ योगियाज्ञवल्क्यः॥ प्राणस्यायमनं कृत्वा
आचामेत्प्रयतोपि सन्। अंतरं विघ्नतेयस्मात्तस्मादाचमनं स्मृतं॥ हेतुनिर्देशस्य स्तास्मिन्नेव प्राणा
यामे आचमनप्राप्त्यर्थः॥ इत्यायुश्चानिवर्धेतु॥ प्रक्षालितपाणिपादो आचाम्य आग्निरश्च मामन्यु राम २६
श्चेति सायमपः पीत्वा सूर्यश्च मामन्युश्चेति प्रातरिति बौधायनवचनमाचमनमंत्रे गौणमुक्तं॥

एतच्च वाक्यं संध्यात्रयकालीनत्वोपत्तायागात् प्राक् आतंतस्मान्मंत्रसंबंधे आचारएव प्रमाणं ॥ अतएव
नमध्यान्हेपि मंत्र इति केचित् ॥ प्रातः सूर्यश्चमेत्युक्त्वा सायमग्निश्चमेति च ॥ आपः पुनंतु मध्यान्हे
कुर्यादाचमनं ततः इति राजा धर्मलिखितं मेत्रापराणि पत्रस्य परिशिष्टवचनप्रमाणमाहुः प्राणाया
मानंतरं मापोहिष्ठेत्यादिना मार्जनमाह ॥ याज्ञवल्क्यः ॥ प्राणानायम्य संप्रोक्ष्य ऋचेनाब्दैवतेन
नतु ॥ विभागमाह व्यासः ॥ त्रिभिः पो द्रोहिष्ठेपेन्नवभिर्मार्जनोपस्यत्यापय ॥ प्रकारमाह छंदोगपरिशि
ष्टे ॥ शिरसो मार्ज्जनं कुर्यात्कुशैः सोदकबिंदुभिः ॥ यत्तु योगियाज्ञवल्क्येन सार्द्धं द्वयायामः प्रतिपा
सार्द्धयोर्द्ध प्रदिपेदिति तेत्र न्वेविभागद्वयकः सप्राचीनमार्जने ॥ एवं संमार्ज्जनं कालाना धसपष्टु
धार्यकरणांमिति ॥ अथान्यंतरस्तु आर्ये प्राणायामानसमुत्पसेदिति उपसंहारात् ॥ एतच्च संमा
र्ज्जनं स्नानासामर्थ्ये संध्यानुकूलत्वो बाधने वा ॥ ना यस्तु आर्ये कारणमिति श्रवणात् ॥ अघि
कफलार्थं वा ॥ अतएव बहुभिरनुष्ठानमनावश्यकत्वात् ॥ कल्पांतरं त्वेति परिभाष्य प्राणा
यामानंतरं मार्ज्जनमाह ॥ ॐकारं व्याहृतीः सप्त गायत्रीं शिरसा सह ॥ आपो हिष्ठा ऋचश्चैव सू
क्तेनैवाघमर्षणमिति ॥ अत्र ह्यापोहिष्ठानंतरमघमर्षणमुक्तं तथापि मध्ये द्रुपदावा
कृत्वा ॥ सर्वत्र मार्ज्जनकर्मणि आदिलिंगानामुदाहृतं ॥ अनंतरं द्रुपदास्वप्यादिकमुक्त्वा अपः
(सूर्यस्यचाप्युपस्थानं गायत्र्याः प्रसंगे जपइति ॥ मार्ज्जनप्राणासंयमयोः पठेक्रमो नाग्राह्यः ॥ प्राणा)
(यामादेः संध्यात्रयोगोपलक्षणार्थत्वात् ॥ एवं कात्यायनेनापि प्राणायामानंतरं उपस्थानाभिधा)

नेसं स्वेपात् ॥ गायत्रीजपे योगियाज्ञवल्क्यः ॥ प्रणवो व्याहृतयः स्वस्त्र अंगानि हृदयादयः त्रि
रावर्त्य ततः पश्चादार्षं छंदश्च दैवतं ॥ विनियोगस्तथा रूपं ध्यातव्यं क्रमशस्त्वव ॥ रूपमाह ॥ श्वेतवर्णा
२७ समुद्दिष्टा कौशेयवसनातथा ॥ श्वेतैर्विलेपनैः पुष्पैरलंकारैश्च भूषिता ॥ आदित्यमंडलस्था च
27 ब्रह्मलोकगताथवा ॥ अक्षसूत्रधरा देवी पद्मासनगता शुभा ॥ आवाह्य जपानेन तेजोसी
ति विधानतः ॥ तत्रावाह्य च जप्त्वा च नमस्कृत्य विसर्जयेत् ॥ गायत्रीमधिकृत्य शतपथश्रु
तिः ॥ तस्या उपस्थानं गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुःपद्यपदसि न हि पद्यसे नमस्ते तुरीया
यदर्शताय पदाय परोरजसेऽसावदो मा प्रापदिति यं द्विष्यादसावस्मै कामो मा समृद्धीति वान
हैवास्मै स कामः समृध्यति यस्मा एवमुपतिष्ठते ॥ उपस्थानं चैतज्जपात् प्राक् ॥ त धाहदेवायाय
नः ॥ उपतिष्ठेत् ततः एतां देवीं तुरीयेण पदेन ॥ ऋषयोप्युदाहरंति गायत्र्यस्येकपदी द्विपदी त्रिपदी
चतुःपद्यपदसि न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजस इत्येनां जपतीति
अस्यापि तावत् द्विनां तुरीयपदस्वरूपकथनं ॥ एवं च भक्त्यावापि परोरजस इत्यंतो मंत्रः ॥
अस्गे चार्षीनादृष्टः ॥ इदं च वैशायनवाक्यं राजाध्यक्षलिखितमपि बहुजनसंमतत्वाल्लिखितं राम २७
जपमाह ॥ योगियाज्ञवल्क्यः ॥

श्रा॰ द॰

पुराण समाधायत्रिः पठेत् द्रुपदामृचं ततोयं मृष्टिर्विनिमस्य सर्वपापैः प्रमुच्यते इति द्रुपदाप्रयोगमुक्त्वा

एवं ज्ञात्वा तु मंत्राणामित्यादिना संध्याभिधानात् ॥ एवं चोक्त एव द्रुपदाप्रयोगः संध्यायां स्मार्त्तैः प्रक

रांतरे प्रमाणाभावात् ॥ अघमर्षणप्रयोगस्तु छंदोगपरिशिष्टे दर्शितः ॥ करेण कृत्वा सलिलं घ्राण

२७ मासन्नमत्र च ॥ जपेदनायतासुर्वा त्रिः सकृद्वाघमर्षणमिति ॥ अनायतासुर्वेति विकल्पबलादप

27 तास्वरनायतासुर्वेति ॥ शंखः ॥ उपस्पृश्य ततः पश्चान्मंत्रेणानेन धर्मतः ॥ अंतश्चरसि भूतेषु

गुहायां विश्वतोमुखः ॥ त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोमृतं ॥ प्राणायामानंतरमाचमन

विधानात् ॥ आयतासुपक्षे शंखोक्तवचनमुपसंहर्त्तव्यमिति केचित् ॥ एतच्चाचमनं प्राग्ज्ञोनं

नेतरं ज्ञ(तमपि स्पष्टंतरोक्ताघमर्षणानंतरमनुष्ठेयं ॥ शंखेनाप्यनंतरं सूर्यांजलिदाना

भिधानादुपस्थानात्प्राक् ॥ छंदोगपरिशिष्टे ॥ उत्थायार्कं प्रतिप्रोहेत्त्रिकेण(णां)जलमंभसः

प्रतिप्रोहेत् क्षिपेत् त्रिकेण प्रणवो भूर्भुवःस्वश्च गायत्री च तृतीयका ॥ इत्यनेनैव प्राग्गुक्तेन

अंजलिमित्येकत्वस्य विवक्षितत्वात् अंजलित्रयदानमयुक्तं ॥ कात्यायनः ॥ पुष्पाण्यंजलि

नात्ति उर्द्ध्वं क्षिप्त्वोर्द्ध्वबाहुः सूर्यमुदीक्षेत ॥ उदुत्यं चित्रं तच्चक्षुरिति गायत्र्या च यथा

शक्ति ॥ अत्र मध्याह्ने संध्यांजलौ सजलपुष्पक्षेपणात् ॥ विष्णुपुराणादौ तोयमात्रस्य राम २७

णमुपलक्षणं ॥ प्रातः सायं विषयं वा ॥ तथा चैतेरीयश्रुतिः ॥ ब्रह्मवादिनः सूर्यमुखाः सं

ध्यायां गायत्र्याभिमंत्रिता आप ऊर्द्ध्वं विक्षिपंति ॥ ता एता आपो वज्रीभूत्वा तानि रक्षांसि मंदेहा

रूरो द्वीपे प्रक्षिपंति ॥ यत्पुरुषद्विरांप्रकामति तेन पाप्मानमवधुन्वंति ॥ उद्यन्तमस्तं यान्तमादित्य
मभिध्यायन्कुर्वन्ब्राह्मणो विद्वान्सकलं भद्रमश्नुते इति नपात्रोर्द्ध्वबाहुविधानात् ॥ तदसंस
क्तपार्ष्णिर्वा एकपाद ऊर्ध्वपाद्वेति ॥ कुर्यात्कृतांजलिर्वापि ऊर्ध्वबाहुरथापि वा ॥ इति छंदोग
परिशिष्टीयमुपस्थाने कृतांजलित्वं सायंप्रातर्विषयमेव उदीच्यतेति सूर्याभिमुखेता
त्पर्ये ॥ ते नमे घादिष्ठि न्नपि संमुखमुपतिष्ठेत् ॥ उपस्थाय उपसंहारात गायत्र्या वा जपि
तयैवोपस्थाने मंत्रकरणकृद्विज्ञानमुपस्थाने तद्य जपे पि संभवति ॥ अनर्थपर एवो
ङ्कारो जपपदन्निति प्रापिके ॥ अन्यत्रार्थपरत्वे प्रमाणाभावात् ॥ अत एव यथाशक्ती
ति नानाजपसंख्यासंभवात् प्रयुक्तं चैतत् ॥ एककालापने न जपानभिधानात् स्तष्यं
तरसंवादाश्चेति ॥ याज्ञवल्क्यः ॥ स्नानमब्दैवतैर्मन्त्रैर्मार्जनं प्राणसंयमः ॥ सूर्यस्य चा
प्युपस्थानं गायत्र्याः प्रत्यहं जप इति ॥ मार्ज्जन प्राणसंयमयोः पाठक्रमो न ग्राह्यः ॥
प्राणायामादेस्ते ध्यान्यायोगोपलक्षणार्थत्वात् ॥ एककालायने नापि प्राणायामानंतरं
उपस्थानाभिधानं संकोचात् ॥ गायत्रीजपे प्रयोगे याज्ञवल्क्यः ॥ प्रणवोऽत्र तु नः स्यज्ञ
अंगानि हृदयादयः ॥ त्रिरावर्त्येत ततः पश्चादार्षं छंदश्च दैवतं ॥ विनियोगस्तथा रूपं ध्यात
व्यं क्रमशस्तावे ॥ रूपमाह ॥ श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा ॥ श्वेतैर्विलेपनैः

आ॰ ९

पुष्परलंकारैश्चभूषिता ॥ आदित्यमंडलस्था च ब्रह्मलोकगताथवा ॥ अक्षसूत्रधरा देवी पद्मा
सनगता शुभा ॥ आवाहयेदनेन विधानेन तेजोसीति विधानतः ॥ तत्रावाह्य च जप्त्वा च नमस्कृत्य
२८ विसर्जयेत् ॥ गायत्रीमधिकृत्य शतपथश्रुतिः ॥ तस्या उपस्थानं गायत्र्यस्येकपदी द्विपदी
७४ त्रिपदी चतुःपद्यपदसि न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदो मा
प्रापदिति यं द्विष्यादसावस्मै कामो मा समृद्धीति वा न हैवास्मै स कामः समृध्यते यस्मा
एवमुपतिष्ठते ॥ उपस्थानं चैतज्जपात्प्राक् ॥ तथा बौधायनः ॥ उपतिष्ठेत एतां देवीं
तुरीयेण पदेन ॥ अथाप्युदाहरंति गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुःपद्यपदसि न हि
पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे इत्येनां जपतीति ॥ अथापीत्यादिना तु
रीयपदस्वरूपकथनं ॥ एवं च कृतावपि परोरजसे इत्यृचो मन्त्रः ॥ अयं गोचार्यवेदः ॥ इदं च बौ
धायनवाक्यं राजाद्यालिखितमपि बहुजनसंमतत्वाल्लिखितं ॥ जप्यमाह ॥ योगियाज्ञ
वल्क्यः ॥ ॐकारः पूर्वमुच्चार्यो भूर्भुवः स्वस्ततः परं ॥ गायत्री प्रणवश्चांते जप्ये चैवमुदाहृ
तं ॥ एवं गायत्र्यादौ द्वितीयोंकारो आरंभांतिमो क्रमत्यागः स्मृत्युक्तः ॥ मंत्रवाद्यावप्यंते तु ओं
कारांतत्वं नातः ॥ यमः ॥ सहस्रपरमां देवीं शतमध्यां दशावरां ॥ गायत्रीं तु जपेन्नित्यं सर्व २८
कल्मषनाशिनीं ॥ अत्र बौधायनः ॥ शतकृत्वोपरिमितकृत्वो वा दशावरं ॥ अपरिमित
कृत्वः दशोपरि शतादर्वाग् नियतसंख्याभिलाषी ॥ गोभिलः ॥ कदाचिदपि नो विद्वान्

गायत्रीमुदके जपेत् ॥ गायत्र्यग्निमुखी प्रोक्ता तस्मादुत्थाय तां जपेत् ॥ बृहस्पतिः ॥ माज्ञेनेज ल
मध्ये तु प्राणायामो यतस्ततः ॥ उपस्थानं ततः पश्चात्सावित्रीजप उच्यते ॥ माज्ञेन मन्त्रस्नानांग
त्वेनमपेक्षितं यतस्तातः जले स्थले वा ॥ एवं च प्राणायामस्य संध्यांगत्वात्तस्य जले स्थले विधा
नादुपस्थानपर्यंतासंध्या जलेप्यस्य मते गायत्रीजपस्तु स्थलएवोक्तः ॥ कात्यायनेनो
त्तीर्य प्राणायामादि मुक्तं ॥ नरसिंहपुराणेपि ॥ स्नानोत्तरतर्पणाग्रामुक्तं ॥ दर्भेषु दर्भ
पाणिः सन् प्राङ्मुखः सुसमाहितः ॥ प्राणायामस्तु कुर्वीत यथाशास्त्रमतंद्रितः ॥ जपेद
ष्टशतं सम्यक् सावित्रीजपविद्द्विजः ॥ अथ पुष्पांजलिं क्षिप्त्वा भानवे चोर्ध्वबाहुकः ॥ उदुत्यं
च जपेन्मंत्रं चित्रं तच्चक्षुरित्यपि ॥ प्रदक्षिणमुपावृत्य नमस्कृत्य ततः प्रभुरिति ॥ अत्र द
र्भेष्विति श्रवणात्स्थल एव संध्याकरणमुक्तं ॥ जपानंतरमुपस्थानं प्रकारांतरमेतत् बौधा
यनेतिदर्शनात् ॥ हारीतः ॥ प्राणायामैर्हतिः सावित्रीचेति सावित्रीजपन् पापेभ्यो मुच्यते
शतं जप्त्वा मानसात् पूतो भवति सहस्रं जप्त्वा वाक्कृतात् पूतो भवति ॥ यमः ॥ न तथा वेदजप्ये
न पापं निर्दहति द्विजः ॥ यथा सावित्रीजप्येन सर्वपापैः प्रमुच्यते ॥ अथ जपविधिः ॥
तत्र शंखः ॥ कुशबृष्यामासीनः कुशोत्तरीयं वा पवित्रपाणिः उदङ्मुखः सूर्याभिमुखो
वा अक्षमालामादाय देवतां ध्यायन् जपं कुर्यात् ॥ देवतां ध्यायन्निति देवताध्यानस्य

ध.पा.८

२९ सुवर्णमणिमुक्ताफलस्फटिकपद्माक्षेन्द्राक्षपुत्रजीवकानामन्यतमामक्षमालां कुर्यात्
कुशग्रन्थिकृतां वा हस्तोपयामे गणयेत् ॥ देवतां ध्यायन्निति देवताध्यानस्य जपाङ्गत
29 याविधानात् ॥ यत्र न देवताविधिस्तत्रापि मन्त्रप्रकाश्या देवता ध्येया ॥ हस्तोपयामः
अङ्गुलीनमनं ॥ देशमाह याज्ञवल्क्यः ॥ गृहे त्वेकगुणं जप्यं नद्यां तु त्रिगुणं स्मृतं ॥ गवां गो
ष्ठे शतगुणं मन्त्यागारे शताधिकं ॥ सिद्धिक्षेत्रेषु तीर्थेषु देवतायाश्च सन्निधौ ॥ सहस्रं
शतकोटीनामनन्तं शिवसन्निधौ ॥ तथा तिष्ठञ्छीतमारोर्कं जपं कुर्यात्समाहितः ॥
अन्यत्र प्राङ्मुखः कुर्याद्ब्रह्मपाराणक्रमाराणात् ॥ प्राक्कूलेषु कुशेष्वेव आसीन आसने
शुभे ॥ नात्युच्छ्रितो नातिनीचे दर्भपाणिः सुसंयतः ॥ स्फाटिकेन्द्राक्षरुद्राक्षपुत्रजीव
समुद्भवैः ॥ अक्षमालादिकं तत्राप्युत्तमाद्युत्तरोत्तरा ॥ प्राक्कूलेषु प्रागग्रेषु दीर्घका
लीनफलार्थी जपेत्तमा हा ॥ शाकयावकभैक्ष्याणि पयोमूलफलानि च ॥ दधिस उ३ =
र्पिस्तथा ह्यापः प्रशस्तं ह्युत्तरोत्तरं ॥ गरवो ह्युपवासश्च नैतेन क्रमयाचितं ॥ विशे
षं गारशाल्मकहविष्यान्नानि यानि तु ॥ एतान्यनुव्रतान्याहुः शस्तानि जपकर्मणि राम २९
पुनर्नैसोपादानप्रशस्तार्थः ॥ अत्र शाकादीनां विकल्पाद्गुणविशेषेण जपारम्भे एका
दश्युपवासोऽपि न कर्तव्य इति हरिहरः ॥ एतान्यनुव्रतानीत्युपसंहारादिति रव्याहृतो

तात्पर्यं एषांतु विकल्पः समुच्चयो वेति नास्याजप्यमाह ॥ मनुः ॥ वेदमेव जपेन्नित्यं यथाकाल
मतंद्रितः ॥ तं ह्यस्याहुः परं धर्ममुपधर्मोन्य उच्यते वेदमेवेत्यावश्यकाग्निहोत्राद्यर्थं फलाधिक्या
र्थं वा परमो धर्मश्च तपसंज्ञाराल् अन्यतानपौराणकादिमंत्रजपे निषेधः ॥ याज्ञवल्क्यः यज्ञा
नां तपसां च वस्तु भानां चैव कर्मणां वेदएव द्विजातीनां निःश्रेयसकरः परः विष्णुः स्नातश्च पवि
त्राणि यथाशक्ति जपेत् विशेषः सावित्रीं पुरुषसूक्तं चैव नैताभ्यामधिकमस्ति ॥ शंखः ॥ ना
घमर्षणात्परमं तर्जी नेन मात्रतिम्यः परं होमेन सावित्र्याः परं जप्ये ॥ मनुयमशंखवसिष्ठ
हारीतयोगियाज्ञवल्क्याः ॥ जप्येनैव तु संसिद्ध्येत्ब्राह्मणो नात्र संशयः ॥ अंगिराः ॥ प्रणवा
द्यास्तथा वेदाः प्रणवे पर्यवस्थिताः ॥ वाङ्मयं प्रणवः सर्वं तस्मात्प्रणवं ततः ॥ नरसिं
हपुराणे ॥ त्रिविधो जपयज्ञः स्यात्तस्य भेदं निबोधत ॥ वाचिकश्च उपांशुश्च मानसस्त्र
त्रिधा स्मृतः ॥ त्रयाणां जपयज्ञानां श्रेयान् स्यादुत्तरोत्तरः ॥ यदुच्चनीचस्वरितैः स्प
ष्टशब्दवदक्षरैः ॥ मंत्रमुच्चारयेद्वाचं जपयज्ञः स वाचिकः ॥ शनैरुच्चारयेन्मंत्रमीष
दोष्ठौ प्रचालयेत् किंचिच्छब्दं स्वयं विद्यात् उपांशुः स जपः स्मृतः ॥ धिया यदक्षरश्रेण्या
वर्णाद्वर्णं पदात्पदं ॥ शब्दार्थचिंतनाभ्यासः स उक्तो मानसो जपः ॥ एवं च त्रिविधस्या
पि जपस्य विधानात् नोच्चैर्जपं बुधः कुर्यात् सावित्र्यास्तु विशेषत इति शंखोक्तम न्य

श्री ८

कालान्निश्चायं ॥ ध्यायेत मनसा मंत्रान् जिह्वौष्ठौ न विचालयेत् ॥ न कंपयेच्छिरो ग्रीवां दंतान्नैव
३० प्रकाशयेदिति योगियाज्ञवल्क्यस्योक्तं मानसजपविषयं याज्ञवल्क्यः ॥ न चंक्रमन्न
30 हसन्न पार्श्वमवलोकयन् नापाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा ॥ न पदा पादमाक्रम्य
न चैव हि तथा करौ ॥ न वा समाहितमना न च संश्रावयन् जपेत् ॥ न क्लिन्नवासाः स्थल
गो जपादीनाचरेद्बुधः ॥ व्रतादृते नार्द्रवासा नैकवासाः समाचरेत् ॥ न जीर्णेन न भिन्नेन
न तु परिक्लिष्टेन वा जपेत् ॥ यत्तदा तस्य कृतानि सिद्धविद्याधरागणाः ॥ हरंति त्रसमं पस्मा
तस्मादुक्तं समाचरेत् ॥ जपकाले न भाषेत व्रतहोमादिकेषु च ॥ एतेष्वेवावसक्तं तु यद्यागच्छे
द्द्विजोत्तमः ॥ अभिवाद्य ततो विप्रं योगक्षेमं च कीर्तयेत् ॥ स्त्रीशूद्रौ नासीत यावत् चंडालपति
तादिकान् ॥ दृष्ट्वा तान्वाप्युपस्पृश्य भाष्य स्नात्वा पुनर्जपेत् ॥ न चैव हि तथा करौ पादौ वा
क्रम्येति विशेषः ॥ एतेष्वेवावसक्तं जपादिषूक्तं तथा यदि वाग्यमलोपः स्यात् जपादिषु कथंच
न ॥ व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययं ॥ बोधायन ॥ कषायवासाः कुरुते जपहोमप्र राम
तिग्रहान् ॥ न तद्देवगमं भवति हव्यकव्ययोर्हविः ॥ व्यासः ॥ आर्द्रवासास्तु यः कुर्याज्जपं ३०
होमं प्रतिग्रहं ॥ सर्वं तद्राक्षसं विद्याद्बहिर्जानु च यत्कृतं ॥ वसिष्ठः ॥ जपहोमोपवासेषु
धौतवस्त्रधरो भवेत् ॥ अलंकृतः शुचिर्मौनी श्राद्धार्थी विजितेंद्रियः ॥ लघुहारीतः ॥

जपे होमे तथा दाने स्वाध्याये पितृतर्पणे ॥ अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैः ॥ चितौ दर्भाः
पथि दर्भा ये दर्भा यज्ञभूमिषु । स्तरणासनपिंडेषु षट् कुशान्परिवर्जयेत् ॥ पिंडार्थं ये स्तृ
ता दर्भा यैः कृतं पितृतर्पणं । मूत्रोच्छिष्टे धृता ये च तेषां त्यागो विधीयते ॥ नवीन पथे च ये द
र्भा ब्रह्मसूत्रेषु ये धृताः पवित्रांस्तान्विजानीयाद्यथा कायस्तथा कुशाः ॥ अन्यत्र ल
परिशिष्टे ॥ अमेध्याक्लिन्ना ये दर्भास्तेषां त्यागो विधीयते ॥ तथा दर्भाः कृष्णाजिनं मंत्रा ब्राह्मणा
हविरग्नयः ॥ अयातयामान्येतानि नियोज्यानि पुनः पुनः ॥ यातयाम चिरंतनत्वेन कार्या
क्षमं ॥ मरीचिः ॥ मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः ॥ अयातयामास्ते दर्भा विनि
योज्याः पुनः पुनः ॥ एवं च विष्णौ तु प्रेक्ष कुशा नोत्पाटनीया इति प्रसिद्धिरसमीचीनैव
छंदोगपरिशिष्टे ॥ यत्रोपदिश्यते कर्म कर्तुरंगं न चोच्यते दक्षिणस्तत्र विज्ञेयः कर्मणां
पारगः करः ॥ यत्र दिङ्नियमो नास्ति जपहोमादिकर्मणि ॥ तिस्रस्तत्र दिशः प्रोक्ता ऐंद्री सौम्या
पराजिता ॥ आसीन ऊर्ध्वः प्रह्वो वा नियमो यत्र नेदृशः ॥ तदासीनेन कर्तव्यं न प्रह्वेण न ति
ष्ठता ॥ सौम्याद्यंतरा अपराजिता ऐशानी ॥ यज्ञोपवीतिना भाव्यं सदा बद्धशिखेन तु ॥ वि
शिखो व्युपवीतश्च यत्करोति न तत्कृतं ॥ सदेति ग्रावणात्कर्मकाले अकर्मकाले वा ॥ यज्ञनि
वीतप्राचीनावीतयोर्नैव धीस्तत्र सर्वत्रोपवीतं एवं च यज्ञदेवकार्ये द्विजो नोपवीतीति त्वं कृते

श्रा॰द॰

तत्रापि दैवमुपलक्षणं ॥ पितृमनुष्यकार्यातिरिक्तं सर्वं दैवमिति गोभिलः ॥ दक्षिणं बाहुमुद्धृत्य
शिरो नाधाय सव्येंऽशे प्रतिष्ठापयति दक्षिणं कक्षमवलंब्य भवत्येवं यज्ञोपवीती भवति सव्यं बाहु
मुद्धृत्य शिरो नाधाय दक्षिणांऽशे प्रतिष्ठापयति सव्यं कक्षमवलंब्य भवत्येवं प्राचीनावीती
॥ मनुः ॥ निवीती कंठसज्जने ॥ वायुपुराणे ॥ त्रिःपाणः कुरुतो मोहादनाचम्यैव नास्तिकः ॥ भव
ति चिवृथा तस्य क्रियाः सर्वा न संशयः ॥ बोधायनः कर्मस्वेतेनाभेरधः स्पर्शो नैव वर्जयेत्
॥ छंदोगपरिशिष्टे ॥ पितृमेधानुद्रवणे आत्मालंभने अपवेक्षणे ॥ अधोवायुसमुत्सर्गे
प्रहासेऽनृतभाषणे ॥ मार्जारमूषिकास्पर्शे आक्रुष्टे क्रोधसंभवे ॥ निमित्तेष्वेषु सर्वेषु
कर्म कुर्वन्नपः स्पृशेत् ॥ अनुद्रवणे उच्चारणे ॥ आत्मालंभने हृदयस्पर्शे ॥ अवेक्षणे हृ
दयस्यैव ॥ मार्जारस्पर्शोऽत्र मार्जारकृत एव स्वयंकृते स्नानस्योक्तत्वात् ॥ योगियाज्ञव
ल्क्यः ॥ सोऽप्यत्रागुरान्मंत्रांस्तपावैवाभिचारकान् ॥ व्याहृत्यालभ्य चात्मानं मपः स्पृ
श्यान्यदाचरेत् ॥ सर्ववाक्येष्वपि प्रमेधानुद्रवणे आत्मालंभने चाचमनदर्शनात् ॥ अपः
स्पृष्ट्वेत्यादि आचमनपरमेव ॥ याज्ञिकसंप्रदाये जलस्पर्शनमात्रं ॥ येषां सर्वं जाप्यपस्पृशे
दिति पाठस्तेषां जलस्पर्श एवाविवादः ॥ परिधानाद्बहिः कक्षा निबद्धा ह्यासुरी भवेत् राम २९
॥ धर्मे कर्मणि सा विद्वद्भिर्वर्ज्जनीया प्रयत्नतः ॥ तथा ॥ नाविरक्तस्य चित्तीडां कर्मणा ॥

मनसा गिरा ॥ आचारन्नभिषेकं तु कर्मारण्यानि नाचरेत् ॥ विधिहीनं भावदुष्टं कृतमश्रद्धया
च यत् तद्भवेत्त्वसुरास्तस्य मूढस्य दुष्कृतात्मनः ॥ तथा ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेता
ध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णमिति श्रुतिः ॥ अध्वरेष्विति वैदिकं कर्मस्मार्तमपरं
अथ संध्याप्रयोगः ॥ ॥ वामे वक्त्रे न कुशान्दक्षिणे पाणौ सपवित्रं कुशत्रयं च धृत्वा तत्र गायत्र्या
शिखां बद्ध्वा ऐशान्यामभिमुख आचम्य स्पृष्ट्वा तमिमं अपुनराचामेत् ॥ ततो वारिणात्मानं वेष्ट
यित्वा सप्रणवगायत्र्या रक्षां कुर्यात् ॥ तत ओंकारस्य ब्रह्मऋषिर्गायत्री छंदोऽग्निर्देवता शुक्लो
वर्णः सर्वकर्मारंभे विनियोगः ॥ सप्तव्याहृतीनां प्रजापतिरृषिर्गायत्र्युष्णिगनुष्टुब्बृहती
पंक्तित्रिष्टुब्जगत्यश्छंदांस्यग्निवाय्वादित्यबृहस्पतिवरुणेन्द्रविश्वेदेवा देवता अनादिष्टप्रा
यश्चित्ते प्राणायामे च विनियोगः ॥ गायत्र्या विश्वामित्रऋषिर्गायत्री छंदः सविता देवता
अग्निर्मुखमुपनयने प्राणायामे च विनियोगः ॥ शिरसः प्रजापतिरृषिस्त्रिपदा गायत्री छंदो
ब्रह्माग्निवायुः सूर्यो देवताः प्राणायामे विनियोगः ॥ इति ऋष्यादिकं स्मृत्वा बद्धासनः सम्मी
लितनयनो मौनी प्राणायामत्रयं कुर्यात् ॥ तत्र वायोरादानकाले पूरकनामा प्राणायामः
तत्र श्यामं चतुर्भुजं विष्णुं नाभौ ध्यायेत् ॥ धारणाकाले कुंभकस्तत्र कमलासनं रक्तवर्णं चतुर्व
क्त्रं ब्रह्माणं हृदि ध्यायेत् ॥ त्यागकाले रेचकस्तत्र श्वेतं ललाटदेशे त्रिनेत्रं शिवं ध्यायेत्
त्रिष्वप्येतेषु प्रत्येकं त्रिर्मंत्राभ्यासः प्रत्येकमोंकारादिसप्तव्याहृतयः ॥ ओंकारादिसावित्री

ॐकार इत्यस्य नयस्य शिरसश्चेति मंत्रः। तस्य स्वरूपं ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः
ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ आपो ज्योती
रसोऽमृतं ब्रह्म भूर्भुवः स्वरों। ततः सूर्यश्चमेति ब्रह्मा ऋषिः सूर्यो देवता प्रकृति छंदः
२२ 32 अपामुपस्पर्शने विनियोगः। ॐ सूर्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षं
तां यद्रात्र्या पापमकर्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुंपतु यत्किंचिद्दु
रितं मयि इदमहं मापो अमृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा। इति प्रातराचामेत्। आपः
पुनंत्विति विष्णुऋषिरनुष्टुप् छंदः आपो देवता अपामुपस्पर्शने विनियोगः। ॐ आपः पुनं
तु पृथिवीं पृथिवी पूता पुनातु मां पुनंतु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु मां। यदुच्छिष्टमभोज्यं च यद्वा
दुश्चरितं मम। तत्सर्वं पुनंतु मामापो असतां च प्रतिग्रहं स्वाहा। इति मध्याह्ने आचामेत्
अग्निश्चमेति रुद्र ऋषिरग्निर्देवता प्रकृति छंदोऽपामुपस्पर्शने विनियोगः। अग्निश्च मामन्यु
श्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यदह्ना पापमकर्षं मनसा वाचा हस्ताभ्यां पद्भ्या
मुदरेण शिश्ना अहस्तदवलुंपतु यत्किंचिद्दुरितं मयि इदमहं मापो अमृतयोनौ सत्ये ज्योतिषि जु
होमि स्वाहा। इत्यनेन सायमाचामेत्। ततः आपो हिष्ठेति सिंधुद्वीप ऋषिर्गायत्री छंदः
आपो देवता मार्जने विनियोगः। ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्ष
से। यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः। तस्मा अरं गमाम वो यस्य क्षयाय जि
न्वथ। आपो जनयथा च नः। ततः ॐकारेण जलमादाय वारत्रयं उपरि पठित्वा तज्जलं शिरसि

क्षिपेत् द्रुपदादिवेति कोकिलो राजपुत्र ऋषिरनुष्टुप् छंदः आपो देवता सौत्रामण्यवभृथे विनियोगः
ओं द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवाज्यमापः शुंधंतु मैनसः
ततः करसंपुटे जलं नासापुटे योजयित्वा आयतासुरनायतासुर्वा त्रिः सकृद्वा अघमर्षणं जपेत् अघ
मर्षणस्य सूक्तस्याघमर्षण ऋषिरनुष्टुप् छंदो भाववृत्तं दैवतं अश्वमेधावभृथे विनियोगः
ओं ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत ततो रात्र्यजायत ततः समुद्रो अर्णवः समुद्रादर्णवाद
धि संवत्सरो अजायत अहोरात्राणि विदधद्विश्वस्य मिषतो वशी सूर्याचंद्रमसौ धाता यथा
पूर्वमकल्पयत् दिवं च पृथिवीं चांतरिक्षमथो स्वः ततओं अंतश्चरसि भूतेषु गुहायां विश्व
तो मुखः त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतं इत्यनेन आचामेत् तउस्याय ओं भूर्भुवः
स्वरिति गायत्र्या च पुष्पमिश्रांजलिं सूर्याभिमुखं क्षिपेत् ततो भूम्यलग्नगुल्फतलभा
गो वा भूमिलग्नार्द्धचरणो वा भूमिलग्नैकचरणो वा प्रातः सायं च कृतांजलिर्मध्याह्ने ऊ
र्द्ध्वबाहुः सूर्यमुपतिष्ठेत् एभिर्मंत्रैः उद्वयमित्यस्य हिरण्यस्तूप ऋषिर्गायत्री छंदः सूर्यो दे
वता सूर्योपस्थाने विनियोगः ओं उद्वयं तमसस्परि स्वः पश्यंत उत्तरं देवं देवत्रा सूर्यम
गन्म ज्योतिरुत्तमं उदुत्यमिति प्रस्कण्व ऋषिर्गायत्री छंदः सूर्यो देवता सूर्योपस्थाने विनि
योगः उदुत्यं जातवेदसं देवं वहंति केतवः दृशे विश्वाय सूर्यं चित्रमित्यस्य कौत्स ऋषि

मा० द०

त्रिष्टुप् छंदः सूर्यो देवताऽग्निष्टोमोपस्थाने विनियोगः ॥ ओं चित्रं देवानामुदगादनीकं
चक्षुर्मित्रस्य वरुणस्याग्नेः आप्रा द्यावापृथिवी अंतरिक्षꣳ सूर्य आत्मा जगतस्तस्थु
२२ षश्च ॥ तच्चक्षुरित्यस्य पुरउष्णिक् छंदो दध्यङ्ङाथर्वण ऋषिः सूर्यो देवता सूर्यो
पस्थाने विनियोगः ॥ ओं तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत ॥ पश्येम शरदः शतं
जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः
शतं भूयश्च शरदः शतात् ॥ ओं हृदयाय नमः ॥ ओं भूः शिरसे स्वाहा ॥ ओं भुवः शिखायै
वषट् ॥ ओं स्वः कवचाय हुं ॥ ओं भूर्भुवः नेत्राभ्यां वौषट् ॥ ओं भूर्भुवः स्वः अस्त्राय फ
ट् ॥ इत्यंगानि त्रिरावर्त्य सर्वांगं मस्तकादिकं स्पृष्ट्वा सर्वं न्यस्य गायत्रीं ध्यात्वा तेजोसीति देवा
ऋषयः शुक्रं देवतं गायत्री छंदो गायत्र्यावाहने विनियोगः ॥ ओं तेजोसि शुक्रमस्य
मृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि ॥ इत्यावाह्य ॥ ओं गाय
त्र्यस्येकपदी द्विपदी त्रिपदी चतुःपद्यपदसि नहि पद्यसे ॥ नमस्ते तुरीयाय दर्शताय पदा राम २२
य परोरजसे सावदोमित्युपस्थाय प्रातः प्राङ्मुखो मध्यान्हे सूर्याभिमुखस्तथा सायं पश्चि
माभिमुख उपविश्य उक्त जपविधिना गायत्रीं जपेत् ॥ जप्यस्वरूपं ॥ ओं भूर्भुवः स्वः तत्सवि
तुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ ओं ततः प्रदक्षिणीकृत्य नमस्कारोपस्थ

विसर्जयेत् ॥ अथ ब्रह्मयज्ञः ॥ तत्र कात्यायनः ॥ विभाडित्यनुवाकस्य पुरुषसूक्तस्य शिवसंकल्पस्य मण्डलब्रा-
ह्मणस्येति सूपस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविशेद्दर्भेषु दर्भपाणिः स्वाध्यायं च यथाश-
क्त्यादावारभ्य वेदं ॥ विभाडित्यादिना आदित्योपस्थानं कार्यं ॥ मध्याह्ने वोदये चैव विना
डादित्रयाज्जपेदिति छंदोगपरिशिष्टदर्शनात् स्वाध्यायं कुर्यादिति शेषः ॥ यथाशक्त्य-
त्यादिना स्वाध्यायबलात्तगं वेदं पठेदिति शेषः ॥ तत्रापस्तम्ब ॥ यथाध्यायमुत्सृजन्वाचा
मनसा चानध्याये ॥ यथाध्यायमुत्सृजेत् ॥ यद्यधीतं तत्रामुजन्वाचा मनसा चेदुभाय
त्त्रय धीतेति शेषः ॥ एवं वाचानध्याये मनसाध्ययनविधानान्नैत्यिकेनास्त्यनध्यायो ब्र-
ह्मयज्ञं इति स्मृतमिति मन्त्रके मानसं विजपमेव छंदोगपरिशिष्टे ॥ यद्यशक्तिर्जपः
श्रौतो ब्रह्मयज्ञसंज्ञ्यते ॥ स चार्वाक् तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः ॥ वैश्वदेवावसा-
ने वा नान्यत्रेति निमित्तकात् ॥ कृते निमित्तकान्ते ॥ जलस्थतर्पणादिनिमित्तं विना ॥
याज्ञवल्क्यः ॥ वेदाथर्वपुराणानि सेतिहासानि शक्तितः ॥ जपयज्ञार्थसिद्ध्यर्थं विद्यां
चाध्यात्मिकीं जपेत् ॥ अत्र पंचदशस्यास्य मन्त्रवेदाध्यायिना आदावारभ्य वेदपाठेन
स्वाध्यायः करणीयः ॥ एकदेशाध्यायिना पुरुषसूक्तादिपवित्रपाठेन ॥ सावित्रीमात्रा-
ध्यायिना प्रणवादिपाठेनेति ॥ ॥ अथ तर्पणं ॥ ॥ तत्र शातातपः ॥ तर्पणं तु शुचिः
कुर्यात्प्रत्यहं स्नातको द्विजः ॥ देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमं ॥ ब्रह्मादिमितिवचना

न्नित्याधिकारः ॥ तदुक्तं छंदोगपरिशिष्टे ॥ तस्मात्स्वैरेव कर्त्तव्यमकुर्वन्नेह तेन सा युज्यते ब्राह्म
णः कुर्वन्विश्वमेतद्धि भर्त्ति हि ॥ विष्णुपुराणे ॥ शुचिवस्त्रधरः स्नातो देवर्षिपितृतर्प्पणं ते
२४ षामेव हि तीर्थेन कुर्वीत सुसमाहितः ॥ तेषां देवर्षिपितृणां ऋषितीर्थमंगुल्यग्रमार्षं यमिति बौ
३५ धायनोक्तं ॥ विष्णुः ॥ स्नातश्चार्द्रवासा देवर्षिपितृतर्प्पणमंभस्थ एव कुर्यात् ॥ परिवर्त्तितवा
साश्चेत्तीर्थमुत्तीर्य ॥ अंभस्थ इति छंदोगपरिशिष्टे ॥ कात्यायनादिरुक्तीर्थेष्वनंतरं विधा
नात् स्थलस्थो जपेत्तेवा ॥ यदाह योगियाज्ञवल्क्यः ॥ यत्रास्तु विस्थलं वास्यादुदके दे
वताः पितॄंस्तर्प्य ॥ तर्प्पयेद्यथाकाममप्सु सर्वं प्रतिष्ठितं ॥ फलार्थमपि जले तर्प्पणमाह
कार्ष्णाजिनिः ॥ आपो देवगणाः सर्वे आपः पितृगणाः स्मृताः ॥ तस्माज्जलेजलं देयं
पितॄणां दत्तमक्षयं ॥ तथा ॥ देवतानां पितॄणां च जले दद्याज्जलांजलिं ॥ असंस्कृतप्रमी
तानां स्थले दद्याज्जलांजलिं ॥ एवं च जलतर्प्पणपक्षेऽत्र संस्कृतप्रमीतानां स्थले ए
व जलदानं ॥ अत्र च जलतर्प्पणपक्षे उपस्थानपर्यंता संध्या जले ततस्तर्प्पणानंतरं
उत्तीर्य गायत्रीजपो ब्रह्मयज्ञश्च ॥ तर्प्पणानंतरमपि ब्रह्मयज्ञस्य नृसिंहपुराणे दो द
र्शनात् ॥ गायत्रीजपात्पूर्वं वैश्वदेवावसाने नासौ स्नात् ॥ हारीतः ॥ देवाश्च पितरश्चैव श्रा २४
कांक्षंति सरितं प्रति ॥ अदत्ते तु निराशास्ते प्रतियांति यथागतं ॥ अप्रदत्ते उदके शीतोरोषः
पितृगणास्तु यमः ॥ अपि नः स कुले जायाद्यो नो दद्याज्जलांजलिं ॥ नदीषु बहुतोयासु

शीतस्य विशेषतः ॥ शंखलिखितौ ॥ वापीतडागोपानेषु सम्नपं चाद्दन्वा पिंडानुद्धृत्य देवपितृतर्पणं चेत्
अथैवं वचनादौ यथासंख्यं सप्तपिंडानुद्धारः ॥ आसामवर्ण्यादिना स्नानाभावेपि तर्पणांगत्वात् स्ना
नपक्षेपि स्नातस्य सर्वं कर्त्तव्यम् ॥ स्नानांगतर्पणेनैव प्रसंगात् स्वतंत्रतर्पणाधिकारसिद्धिः
अतो न पृथक्पिंडोद्धारः एकप्रयोगत्वात् ॥ तथा च योगियाज्ञवल्क्यः उपस्थानादि पश्चात्सां मंत्र
वान्कीर्तितो विधिः ॥ निवेदनांतं तत्स्नानमित्याहुर्ब्रह्मवादिनः ॥ उपस्थानं उदु त्यं हीत्यादिमंत्रैः
तासामपां निवेदनं देवगातुविद इति मंत्रेण वक्ष्यमाणं एवं च मध्याह्नसंध्यायाः स्वतंत्राया अपि स्ना
नप्रयोगांतर्भावः ॥ अत एव स्नानसंध्याकर्मणोनंतरं तर्पणानुष्ठानं ॥ योगियाज्ञवल्क्यः
च आपो वा ह्यमर्षणमंत्रैः शीर्षे कुशान्धृत्वा न ॥ प्रागग्रेषु सुरान्सम्यक् ग दक्षिणाग्रेषु वै पितॄन्
पूर्ववत्तर्पयेदिति संबंधः ॥ तेन पितृतर्पणे उंकारस्थ तामिति वक्ष्यते ॥ मंत्रैरुदीरतामवर इ
त्यादिभिः ॥ कल्पतरुकारः पूर्ववन्मंत्रैर्याज्ञवल्क्यः पूर्वसंहितायाः आवाहनमंत्रैरावाह्येति
संबंधमाह तदयुक्तं योगिशास्त्रं चमत्प्रोक्तमिति संहितांतरेभिधानात् ॥ योगियाज्ञवल्क्यः स्मृ
ते वक्ष्यवीपतः ॥ स्नानमदेवैतैर्मंत्रैर्यत्नेणो कंतुरान छेति गं पंत्तरमाह ॥ तत्रापि पूर्वी ध्याये
भिधानात् किं विश्वेदेवासइत्युच्य ॥ उसंतस्त्वेत्य च द्वयस्मे नावाहनमाह ॥ विनियोगा
न्मंत्रैरितिवकुलेंदुलमं ॥ विश्वेदेवासइत्यादिमंत्रस्य ब्रह्मादिप्रकाशनसामर्थ्यमपि ना

स्मा० द०

स्त्री तु चैकैव त्वारब्धा ॥ तथा च कार्ष्णाजिनिः ॥ राव्वाहनमंत्रमाह ॥ नाभिमात्रे जले स्थित्वा चिंतयेदूर्ध्व
मानसः ॥ आगच्छंतु मे पितर इमं गृह्णंतु अपोंजलिं ॥ एवं च देवावाहनमपि देवा ॥ आगच्छात दीयतेतो
यं नोपतिष्ठति कस्य चित् ॥ आगच्छंत्विति कर्तव्यं पित्र्यावाहन एवान्य मंत्र दर्शनात् ॥ आवाह्ये
३१ ति तत्परमेतत् ॥ यमः ॥ नमो पदापो दीयंते दाता चैव जले स्थितः ॥ दत्ता न दीयते तोयं नोप
35 तिष्ठति कस्य चित् ॥ एतेन जलेस्थो जल एव तर्पणजलं प्रदद्यादिपेत् ॥ हलायुधः ॥ स्थलस्थो न स्थ
ल इत्युक्तं व्यामिश्राह शंखः ॥ नोदकेषु न पात्रेषु न क्रुद्धो नैकपाणिना ॥ नोपतिष्ठति तत्तोयं
यन्न भूमौ प्रदीयते ॥ बौधायनस्मृतौ ॥ स्थलस्थेनापि तर्पणजलं जल एव प्रक्षेप्तव्यं ॥ वासः
परिधानानंतरमप्सु तर्पणविधानात् ॥ हरिहरस्तु ॥ जलसमीपस्थेन तर्पणजलं जल एव
प्रक्षेप्तव्यं यदा चोद्धृतजलेन तर्पणं तदेव स्थले तर्पणजलप्रक्षेपः ॥ तद्विषयमेव प्रागुक्तं
शुष्कानि साह ॥ तदयुक्तं ॥ उदके नोदकं कुर्यादिति त्वष्टावकदावचनः ॥ उत्तीर्य च शुचौ देशे कु
र्यादुदकतर्पणमिति ॥ शंखेन जलस्थतर्पणं निवार्य शुचौ देशे तर्पणमिति विधायनोद
के षिवति पुनरुदकनिषेधस्तीरस्थस्यापि जलप्रक्षेपे फलाशतितन्मते स्थलस्थेन स्थल ए राम
व प्रक्षेप्तव्यमिति बौधायनमते स्थलस्थेन जले जलप्रक्षेप इति विकल्प एवेति ॥ सुमंतुः ॥ ३५
आकाशे प्रक्षिपेद्वारि जलस्थो दक्षिणामुखः ॥ आकाशो जलोपर्येव ॥ योगियाज्ञवल्क्यः ॥

यद्युद्धृते प्रसिंचेद्वै तिलान् संमिश्रयेज्जले॥ अतो मध्यात्तु सव्येन तिलाग्राह्या विचक्षणैः॥ अस्यार्थः॥ यद्युद्ध-
तोदकमादाय तर्पणं करोति तदा जले तिलप्रक्षेपः स्यात्॥ यदा तु जलाशयस्थ एव जलमादाय तदा वाम-
हस्तेन तिलग्रहणं॥ मरीचिः॥ तिलानामप्यभावे तु सुवर्णरजतान्वितं॥ तदभावान्निषिंचेत मंत्रै-
र्दर्भैस्तांबा पुनः॥ अत्र सर्वाभावे उत्तरोत्तरविधिरिति क्रमो वाक्यांतरविरोधात् सव्यः॥ किंतु तिला-
दीनां समुदितानामप्यभावे एकदेशोपादानप्रदर्शनमिदं॥ एवं च विनापि सुवर्णेन विना ताम्रं तु तिले-
स्साध्य॥ विना दर्भैश्च मंत्रैश्चापि तृप्तीनोपपत्तिः स्यात् इति शंखवचनं रूप्यादीनां सर्वेषामभावे न त्वेक-
देशाभावेपि॥ सौवर्णेन तु पात्रेण राजतोदुंबरेण च॥ खड्गपात्रेण वा शंकुनापि उदकं पितृतीर्थ-
स्पृशात् दद्यात् इति शेषः॥ स्कं सति संभवे॥ शंकुः कीलकः सत्तु सुवर्णादिनिर्मितः प्रकृतत्वात् मध्यो
द्व्यंगुलत्रयः शंकुरिति केचित्॥ नीखी न जलं जलीन्द्याद्युद्धे रुध्यंतरं ततः॥ गोशृंगमात्रमु-
द्धृत्य जलमध्ये जलं क्षिपेत्॥ अस्यार्थः॥ त्रिवाबद्धांजलित्रय उच्चरोत्तरवृद्धः कर्तव्यो गोशृंग-
मात्रमिति तत्तीयांजल्युद्धेशत्वनिर्देशः॥ जलमध्ये इति पक्षे जलत्राक्षानुवादः॥ योगियाज्ञव-
ल्क्यः॥ दक्षिणेपि तत्तीर्थेन जलं सिंचेद्यथाविधि॥ दक्षिणेनेव गृह्णीयात् पितृतीर्थसमीपतः॥
दक्षिणोत्कर इति शेषः॥ मरीचिः॥ मुक्त्वा हस्तेन दातव्यं मुद्रां तत्र न दर्शयेत्॥ मुद्रातं कुर्यात् सर्वो-
गेन पितृतीर्थं च रोधः॥ शौखलिखितौ॥ नैककाविते पितृन् तर्पयेत्॥ उशना॥ नवेष्टितशिरा

नक्रुसकषायवासादेवपितृकार्यंकुर्यात्॥ योगियाज्ञवल्क्यः॥ सवर्णेभ्योजलंदेयंनासवर्णेःकदा
चिन॥ मित्रत्वादिप्रसक्तजलदाननिषेधोयं प्रकरणादितिनेतद्बलाद्भ्यांतर्येणनिषे
धोपपत्तिस्तत्रप्रमाणमस्ति॥ पारस्करः॥ ब्राह्मणेन न कर्त्तव्यं शूद्रस्योर्द्ध्वदैहिकं शूद्रेणवाब्रा
ह्मणस्यविनापारसवात्क्वचित्॥ उर्द्ध्वदैहिकमितिसामान्यपरिग्रहात्ज्ञानादि परिग्रहो
ति॥ पारसवः ब्राह्मणात्शूद्रायामुत्पन्नः॥ तेन स्वपितुः कर्त्तव्यमित्यर्थः॥ कात्यायनः॥
तर्प्ययेद्ब्रह्माणंप्रथमंविष्णुरुद्रंप्रजापतिं॥ देवाश्छंदांसिदेवान्ऋषीन्पुराणाचार्यान्गंधर्वानि
तराचार्यान्संवत्सरंदेवीरप्सरसोदेवानुगान्नागान्सागरान्पर्वतान्सरितोमानुष्या
न्यक्षान्रक्षांसिपिशाचान्सुपर्णान्भूतान्पशून्वनस्पतीन्॥ओषधीर्भूतग्रामंचतुर्विधं
तृप्यतामितिओंकारपूर्वं॥ ततोनिवीतीमनुष्यान्सनकंचसनंदनंचतृतीयंचसनातनं॥ कपि
लंचासुरिंचैववोढुंपंचशिखंतथा॥ ततोपसव्यंतिलमिश्रं कव्यवालंनलंसोमंयमंअर्यम
णमग्निष्वात्तान्सोमपान्बर्हिषदोयमांश्चैकेयमायधर्मराजायमृत्यवेचांतकायच
वैवस्वतायकालायसर्वभूतक्षयायच॥ उदुंबरायदध्नायनीलायपरमेष्ठिने॥ वृकोदरा
यचित्रायचित्रगुप्तायवैपुनः॥ एकैकस्यतिलैर्मिश्रान्त्रींस्त्रीन्दद्याज्जलांजलीन्॥ या
वज्जीवकृतंपापंतत्क्षणादेवनश्यति॥ जीवत्पितृकोपितान्मात्रेतरउदीरतामंगिरसःआप

तनुः उर्ज्जंवित्त्यो येचेह मधुना ताइति। ऋचं जपन् प्रसिंचेत्। तृप्यध्वमिति त्रिर्न्नमो वइत्युक्ता।
मातामहाचार्यगुरुशिष्यसख्यज्ञातबांधवाः तर्पितादेहादुधिरेपिबेति पाठक्रमादेवक्र
वेल ब्रह्मप्रभृत्वमिति क्रमाभिधानात् प्रत्येकं ब्रह्मादीनां तर्पणं। एवं तृप्यतामित्योंकार
पूर्वमिति च प्रत्येकमभिसंबध्यते। तदुक्तं योगियाज्ञवल्क्येन। अन्वारब्धेन सव्येन पाणि
नादक्षिणेन तु। तृप्यतामिति सेक्तव्यं नाम्नातु प्रणवादिना। अन्वारंभेन पश्चाल्लग्नेन
एवं च देवतर्पणं। ओं ब्रह्मा तृप्यतामित्यादिरूपं। बहुवचनांतस्तु देवतादिसंबंधेन
वार्थाद्बहुवचनं। गणानामपि नित्यमार्षविशेषणं। सावयव इति संवत्सरविशेषणं।
साकांक्षत्वात्। चतुर्विधमिति भूतग्रामविशेषणं। ततो निवीत्यभिधानात् पूर्वमुत्सर्गा
त्सिद्धमुपवीतित्वमेव। उक्तं च योगियाज्ञवल्क्येन। ब्रह्मादीनुपवीती तु देवतीर्थेन तर्प
येत्। निवीती कायतीर्थेन मनुष्यान् सनकादिकान्। मनुष्यतर्पणमाह। ओं सन
कस्तृप्यतामित्याकारमेव। तृप्यतामिति काव्यस्यापि तदुहारत्वात्। ततोपसव्यमिति
पितृधर्माणामुपलक्षणमेतत्। तेनात ऊर्द्ध्वं दक्षिणामुखत्वमपि। कव्यवालानलोदि
व्यपितृतर्पणोनु स्वधा नम इति योज्यं। नमस्कारस्वधान्वितानिति। योगियाज्ञ
वल्क्यवचनात्। पितृतर्पणेपि स्वधा नम इति हरिहरस्य मते। कव्यवाडनल इत्यकादेव

तेतिकल्पतरुकारः ॥ तत्तुकव्यवाडादय इति गोभिलाभिधानादयुक्तं ॥ अतएव कामधेन्वादौ क-
व्यवाडनलमिति पाठः ॥ यमांश्चैक इति मन्त्रान्तरेणाभिधानान्नावश्यकत्वं ॥ अतएवैकै-
कस्येत्यादिनापाणत्तपरूपकल्पाभिधानं ॥ नमइति सर्वत्रचतुर्थ्यन्तसंबंधः ॥ एतान्यपमान-
तेनजमतर्प्यपर्यन्तं जीवत्पितृकेनापि कर्तव्यं ॥ अन्यांश्चेतरः प्रमीतपितृकः ॥ अन्यानश्च
पित्रादीनपितर्पयेदल्पधीः ॥ जीवत्पितृकस्यापितामहादितर्पणं स्पितृपातित्यपद्दो
येभ्यो नापि पिता दद्यात्तेभ्यो नापि प्रदापयेदिति याज्ञवल्क्यवचनात् ॥ अत्र पित्रादित-
र्पणेऽञ्जलित्रयं यमतर्पणावक्तत्वात् ॥ एवं दिव्यपितृतर्पणेप्यंजलित्रयं तद्वल्लौकि-
त्वात् ॥ एकैकस्येति तत्रापि संबंधात् ॥ ब्रह्मादितर्पणे तो मनुष्यतर्पणे सानुवचोऽन्यमारागा-
मावादेकएवांजलिः ॥ केचित्तु द्विमुपुराणकल्पे त्रिरपः श्रीणानार्थोपदेवानामपवर्जये-
दिति दर्शनादेवतर्पणेप्यंजलित्रयमित्याहुः ॥ तदयुक्तं ॥ पितॄन्पितामहान्प्रपिता-
महान् त्रीनिति श्रुतिपुरुषमभ्यसेदिति छंदोगपरिशिष्टे पुरुषमात्रे अभ्यावृत्तिदर्शना-
त् ॥ एवं च स्त्रीतर्पणेपत्न्येकैकएवांजलिः स्त्रीस्त्रीऽञ्जलांजलीनिति यमोक्तं परपुरु-
षमात्रगोचरमितिबोद्धव्यं ॥ एवं च उदीरतामवरइत्यादिमंत्रानवकस्य पित्रादित्रिकां-
जलिनवकेसंबंधः ॥ अपन्मंत्रान् यथाक्रमममितियोगयाज्ञवल्क्यवचनात् ॥

प्रत्येकमंजलीनांदेयत्वात् । मंत्राणामपिप्रत्येकंप्रकाशनसामर्थ्यात् । सर्वत्रचसर्वान्वयेऽपि
वृत्तिविकल्पोवास्यात् । एवंचैकैकमंत्रपाठानंतरमेकैकांजलिदानंमंत्रादिकर्मादिसन्नि
पातनियमात् । अतएवंजपन्तीतिवर्त्तमानसामीप्यात् नतुमंत्रपाठकालेजलसेकः । गौणाधु
आरणाभावप्रसंगात् । नचमंत्रात्रशक्त्रवाक्यमितिवाच्यंतृप्यंतु । त्वागार्येत्वाद्यदात् । वाक्यमोणात
र्पणमादौउदीरितामित्यादिमंत्रैस्तत्सेकमात्रे । पाठकालएवसेकोऽगमंत्रवदृष्टार्थमिति न
न्नकर्मांतरकल्पनायते । मंत्रेश्वहेलमुदकमितिविरोधाञ्च । तृप्यध्वमितित्रिरितिपित्रा
दित्रयंमिलनवृष्टिरपतृप्यध्वमितिसनेनवारत्रयमुदकंदेयमितिसर्थः । नतुपाठमात्रमेतत् ऽप
दृष्टार्थत्वापत्तेः । प्रसिंचेदित्यन्वयश्च । मातामहादित्रिकेतुनमोवइत्युक्त्वाभिधानादेक
वारमेवमंत्रप्रयुक्तार्घ्यंतर्पणं । प्रसिंचेदितिगणगन्धजलसेकमात्रंतर्पणं । नपितृतुष्टिरूपमा
त्रमितिमन्तोहेयः । नामगोत्रस्वधाकारैस्तर्प्याःस्युरनुपूर्वशः इतियोगियाज्ञवल्क्यात्मागस्थे
नावकाशात् । एवंचदेवतर्पणेऽपित्यागएवनुत्पतयानिर्देशात् । कात्यायनानुक्तमपिदेवतर्प
णमनुष्यतर्पणेऽपिमध्येस्वशाखांतरोक्तंमरीच्यादितर्पणमपिकुर्वीति । युक्तंचैतत् । देवर्षिपितृ
तर्पणानित्यत्वस्यप्रागुक्तत्वात् । अतएवयोगियाज्ञवल्क्योक्तत्वात् स्मृतिमहार्णि
वलिखितंमरीच्यादितर्पणंपद्मपुराणहरिहरोक्तकाममधेनौतुयोगियाज्ञवल्क्यवचनमेव

स्मा०५०

लिखितं तथा षट्पुरुषतर्प्पणानंतरं तेषां स्त्रियः तर्प्याः ॥ जीवत्पितृकस्त्वीन्मातृतः प्रभृत्य

पितृतर्प्पणमिति जैमिनिवचनात् ॥ बौधायने न पितृतर्प्पणानंतरं मातृतर्प्पणं ततो मा

तामह्यादितर्प्पणं ततो मातामहस्यादितर्प्पणमुक्तं ॥ शंखः स्नातः कृतजपो तर्ज्जानुरुद

३८ ङ्मुखश्चादित्येन तीर्थेन देवानुदकेन तर्प्पयेत् ॥ अथ कृतापसव्यो दक्षिणामुखो तर्ज्जानुः

38 पित्र्येण तीर्थेन पितृभ्यो यथाश्राद्धं यथा मंत्रोत्तरीमुदकं दद्यात् पितृपितामहप्रपितामहमा

तृपितामहीप्रपितामहीभ्यश्च आसप्तमात्पुरुषात् पितृपक्षे यावतां नाम जानीयात् ॥ पितृप

त्नीनामुदकतर्प्पणं कृत्वा गुरूणां कुर्यात् गुरूणां कृत्वा मातृपक्षाणां कुर्यात् ॥ मातृपक्षाणां

कृत्वा संबंधिबांधवानां कुर्यात् तेषां कृत्वा सुहृदां कुर्यात् ॥ अंतर्जानुः जानुमध्यकृतक

रः उदङ्मुखश्चेति चकारात् प्राङ्मुखतापि देवतर्प्पणे ॥ मनुशातातपयाज्ञवल्क्याः

॥ यदेव तर्प्पयत्यद्भिः पितॄन् स्नात्वा द्विजोत्तमः ॥ तेनैव सर्वमाप्नोति पितृयज्ञक्रियाफलं

पप्तघुरारो ॥ ब्रह्माणं तर्प्पयेत् पूर्वं विष्णुं रुद्रं प्रजापतिं ॥ देवा यक्षास्तथा नागा गंधर्वाप्स

रसोऽसुराः क्रूराः सर्प्पाः सुपर्णाश्च तरवो जंभकाः खगाः ॥ विद्याधरा जलाधारास्तथैवाका ह्रि

शगामिनः ॥ निराधाराश्च ये जीवाः पापे धर्मे रताश्च ये ॥ तेषामाप्यायनायैतद्दीयते सलिलं मया ३८

कृतोपवीती देवेभ्यो निवीती च भवेत्ततः ॥ मनुष्यांस्तर्प्पयेद्भक्त्या ऋषिपुत्रान् ऋषींस्तथा

सनकश्च सनंदनश्च तृतीयश्च सनातनः कपिलश्चासुरिश्चैव वोढुः पंचशिखस्तथा सर्वे
ते तृप्तिमायांतु मद्दत्तेनांबुना सदा मरीचिमत्र्यंगिरसं पुलस्त्यं पुलहं क्रतुं प्रचेतसं वशिष्ठं
च भृगुं नारदमेव च देवान् ब्रह्मऋषीन् सर्वान् तर्पयेदक्षतोदकैः अपसव्यं ततः कृत्वा सव्यं
जानु च भूतले अग्निष्वात्तास्तथा सौम्या हविष्मंतस्तथोष्मपाः सुकालिनो बर्हिषदस्त
थाज्यपाः पुनः तर्पयेच्च पितृन् भक्त्या सतिलोदकचंदनैः दर्भपाणिस्तु विधिनास्वा
न्वेतांस्तर्पयेत्ततः पित्रादीन्नामगोत्रेण तथा मातामहानपि संतर्प्य विधिना भक्त्या इमं
श्लोकमुदीरयेत् येऽबांधवा बांधवा ये येऽन्यजन्मनि बांधवाः ते तृप्तिमखिलां यांतु पुत्रा
स्मत्तोंऽबुवांछति अत्राहरिहरः देवादीनां देवास्तथैवता मित्यादिवाक्येन तर्पणं तेषां
नाममात्रं यन्नामेति तच्छ्राद्धमात्रे तदमुकं स्तुतवाक्यं विष्णुपवाक्यांतरकल्पनाया
ध्यानकल्प्य नायाश्चायुक्तत्वात् तस्माद्यत्र ब्रह्मादित्यास्मिन्मदीनां क्रमेण श्रुतं तत्रैव प
रं योगि याज्ञवल्क्यवाक्याद्युक्तवाक्यपरिग्रहः निवीती च भवत्तत इति गावरा दृषित
त्वतो निवीतीत्यत्र मोहेयः निवीतस्य मनुष्यधर्मतया तत्र तत्राभिधानात् केचित्तु
पनिवीती ऋषीन् स्तर्पयामीति गोपायन दर्शनात् मरीच्यादितर्पणे निवीति त्वमेवाहुः
अपसव्यतो तोदकैरित्यत्रा तत्पदेजव परं यवाद्भिस्तर्पयेद्देवानिति परिशिष्टदर्शनात्
अत्र ब्रह्मादितर्पणे ॐकारादित्वं तामित्यंतेन नामाद्या देवादीनां देवापत्यादिना
दीपतो सलिलं मयेत्यंते न उपवीती ततो निवीती सनकादीन् सनकश्चेत्यादिना सदेत्यंते

त्रा०द०

न ॥ ततउपवीतीमरीच्यादीनदश ऋषीन् ॐ अग्निष्वात्ताः पितरस्तृप्यंतामिदं तिलोदकं तेभ्यः स्वधा
नम इति सव्येन ॥ ॐ अमुकगोत्रः पिताऽमुकशर्मा तृप्यतामिदं जलं तिलं तस्मै स्वधा इत्यादिवाक्यैः
३९ अष्टपुरुषान् अमुकगोत्रा माताऽमुकदेवी तृप्यतामिदं जलं सतिलं तस्यै स्वधेत्यादिवा
39 क्यैः तेषां स्त्रियः स्तर्पयेत् पित्र्याये वो घवाइत्यादिश्लोकेनावसानांजलिं दद्यादिति प्रयोगः ॥
अथ कात्यायनतर्पणप्रयोगः ॐ ब्रह्मा तृप्यतां ॐ विष्णुस्तृप्यतां ॐ रुद्रस्तृप्यतां ॐ प्रजापतिस्तृ
प्यतां ॐ देवास्तृप्यंतां ॥ ॐ छंदांसि तृप्यंतां ॥ ॐ वेदास्तृप्यंतां ॥ ॐ ऋषयस्तृप्यंतां ॥ ॐ पुराणाचा
र्यास्तृप्यंतां ॥ ॐ गंधर्वास्तृप्यंतां ॥ ॐ इतराचार्यास्तृप्यंतां ॥ ॐ संवत्सरः सावयवस्तृप्यतां ॥ ॐ देव्यस्तृ
प्यंतां ॥ ॐ अप्सरसस्तृप्यंतां ॥ ॐ देवानुगास्तृप्यंतां ॥ ॐ नागास्तृप्यंतां ॥ ॐ सागरास्तृप्यंतां ॥ ॐ प
र्वतास्तृप्यंतां ॥ ॐ सरितस्तृप्यंतां ॥ ॐ मनुष्यास्तृप्यंतां ॥ ॐ यक्षास्तृप्यंतां ॥ ॐ पिशाचास्तृप्यं
तां ॥ ॐ सुपर्णास्तृप्यंतां ॥ ॐ भूतानि स्तृप्यंतां ॥ ॐ पशवस्तृप्यंतां ॥ ॐ वनस्पतयः स्तृप्यंतां ॥ ॐ ओ
षधयः स्तृप्यंतां ॥ ॐ भूतग्रामश्चतुर्विधस्तृप्यतां ॥ उपवीती प्राङ्मुख उदङ्मुखो वा देवती
र्थेनाथवोदकेनउदकेनैवावतर्पयेत् ततः ॐ मरीचिस्तृप्यतां ॥ ॐ अत्रिस्तृप्यतां ॥
ॐ अंगिरास्तृप्यतां ॐ पुलहस्तृप्यतां ॥ ॐ क्रतुस्तृप्यतां ॥ ॐ प्रचेतास्तृप्यतां ॥ ॐ वसिष्ठस्तृ राम ३९
प्यतां ॐ भृगुस्तृप्यतां ॐ नारदस्तृप्यतां ॥ इति ऋषीन्देववत् ततः ॥ ॐ सनकस्तृप्यतां
ॐ सनंदनस्तृप्यतां ॐ सनातनस्तृप्यतां ॥ ॐ कपिलस्तृप्यतां ॥ ॐ आसुरिस्तृप्यतां ॥ ॐ वो
ढुस्तृप्यतां ॥ ॐ पंचशिखस्तृप्यतां ॥ इति मनुष्यान्निवीती कायतीर्थेनेति विशेषः ॥ ततः

कव्यवालस्तृप्यंतामिदंतिलोदकंतेभ्यः स्वधानमः ॥ ॐ नलस्तृप्यंतामिदंतिलोदकंतस्मै
स्वधानमः ॥ ॐ सोमस्तृप्यतामिदंतिलोदकंतस्मैस्वधानमः ॥ ॐ यमस्तृप्यतामिदंतिलोदकंस
तिलंतस्मैस्वधानमः ॥ ॐ अर्यमातृप्यतामिदंजलंतिलोदकंतस्मैस्वधानमः ॥ ॐ अग्निष्वा
तास्तृप्यंतामिदंतिलोदकंतेभ्यः स्वधानमः ॥ ॐ सोमपास्तृप्यंतामिदंतिलोदकंतेभ्यःस्वधा
नमः ॥ ॐ बर्हिषदस्तृप्यंतामिदंतिलोदकंतेभ्यः स्वधानमः ॥ इतिदिव्यपितॄन् प्राचीनावी
ती दक्षिणामुखः पतितवामजानुः सतिलजलांजलिं त्रयेण पितृतीर्थेन तर्पयेत् ॥ ततः
ॐ यमायनमः ॥ ॐ धर्मराजायनमः ॥ ॐ मृत्यवेनमः ॥ ॐ अंतकायनमः ॥ ॐ वैवस्वतायनमः ॥
ॐ कालायनमः ॥ ॐ सर्वभूतक्षयायनमः ॥ ॐ उदुंबरायनमः ॥ ॐ दध्नायनमः ॥ ॐ नीलाय
नमः ॥ ॐ परमेष्ठिनेनमः ॥ ॐ वृकोदरायनमः ॥ ॐ चित्रायनमः ॥ ॐ चित्रगुप्तायनमः ॥ इतिचतुर्द
शयमान्प्रत्येकंसतिलजलांजलित्रयेण ॥ ततः ॥ ॐ आगच्छंतुमेपितरइमंगृह्णंत्वपोंजलिमिति
पितॄनावाह्य ॥ ॐ उदीरतामवरउत्परासउन्मध्यमाः पितरः सोम्यासः ॥ असुंयईयुरवृका ऋतज्ञा
स्तेनोवंतुपितरोहवेषु ॥ ॐ अद्यामुकगोत्रः पितामुकशर्मातृप्यतामिदंजलंसतिलंतस्मैस्वधा॥
इतिमंत्रेणवाक्येनचप्रथमंजलिंपित्रेदद्यात् ॥ ॐ अंगिरसोनः पितरोनवग्वा अथर्वाणो
भृगवः सोम्यासः ॥ तेषांवयंसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम इतिमंत्रेणवाक्येनच
द्वितीयं ॥ ॐ आयंतुनः पितरः सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः ॥ अस्मिन्यज्ञेस्वधयाम

स्म.० ८०

देतो पितृभुवं कुर्वते वंश्यस्मान इति मंत्रेण वाक्येन तृतीयमंजलिं पित्रे दद्यात् ॥ ततः ॐ ऊर्जं वहंतीर
मृतं घृतं पयः कीलालं परिस्रुतं ॥ स्वधास्थ तर्पयत मे पितॄन् ॥ अमुकगोत्रः पितामह अमुक
४० शर्मा तृप्यतामिदं जलं सतिलं तस्मै स्वधा इति प्रथमं ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः
५८ पितामहेभ्यः स्वधायिभ्यः स्वधा नमः ॥ प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः ॥ अक्षन्न पित
रोमीमदंत पितरोतीतृपंत पितरः पितरः शुंधध्वं ॥ इति मंत्रेण वाक्येन द्वितीयं ॐ ये चेह
पितरो ये च नेह यांश्च विद्म यां उ च न प्रविद्म त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सु
कृतं जुषस्व इति मंत्रेण वाक्येन तृतीयं ततः ॐ मधुवाता ऋतायते मधु क्षरंति सिंधवः माध्वी
र्नः संत्वोषधीः ॥ ॐ अमुकगोत्रः प्रपितामहो अमुकशर्मा तृप्यतामिदं जलं सतिलं तस्मै स्वधा
इति प्रथमं ॐ मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः मधु द्यौरस्तु नः पिता इति मंत्रे
णवाक्येन द्वितीयं मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः माध्वीर्गावो भवंतु नः
इति मंत्रेण वाक्येन तृतीयमंजलिं प्रपितामहाय दद्यात ॐ तृप्यध्वं पित्रादिभ्योंजलित्रयं द
द्यात् ॥ ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्व
धायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पित राम
रो दत्त सतो वः पितरो देष्मैतद्वः पितरो वास इति मंत्रं पठित्वा ॥ अमुकगोत्रो मातामहो अमुकशर्मा ४०
तृप्यतामिदं जलं सतिलं तस्मै स्वधा नमः इति मातामहादिभ्यः पंचांजलित्रयं दद्यात् एवं प्रमाता

महाप्रवृद्धिप्रमातामह्यादि तत: ॥ ॐ अमुकगोत्रमाता अमुकदेवी तृप्यतामिदं जलं सतिलं
तस्यै स्वधा इति मातरं ॥ एवमेव पितामहीं प्रपितामहीं मातामहीं प्रमातामहीं वृद्धप्रमातामहीं
स्तर्प्पयेत् ॥ तत आचार्यादीन् नामगोत्रस्वधाकारैस्तर्प्पयेत् ॥ विष्णुधर्मे ॥ इदं चापि जपेत्
वुदकान्तेष्वयान्त उपकाराय देतानां कृतदेवादितर्प्पणैः ॥ देवासुरस्तथा यक्षा नागा गं
धर्वराक्षसाः पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः ॥ जलेचरा भूनिलया वाय्वा
धाराश्च जन्तवः ॥ प्रीतिमेते प्रयान्त्वाशु मद्दत्तेनाम्बुनाखिलाः ॥ ॐ नरकेषु समस्तेषु यातनासु
च ये स्थिताः ॥ तेषामाप्यायनायैतद्दीयते सलिलं मयेति ॥ ॐ ये बान्धवा अबान्धवा ये वान्य
जन्मनि बान्धवाः ॥ ते तृप्तिमखिला यान्तु यश्चास्मत्तोऽभिवाञ्छति ॥ इदं चकास्यतर्प्पणमेभिर्म
न्त्रैर्लौकिके वैदिके विधिना कर्त्तव्यं ॥ अथ विशेषः ॥ स्नानसाट्यन्तु दातव्यामृतदस्तिस्रो विष्णुद्धये
पाराशरः ॥ जलमध्ये तु यः कश्चिद्द्विजातिर्ज्ञानदुर्बलः ॥ निःपीडयति तद्वस्त्रं स्नाने तस्य
वृथा भवेत् ॥ योगियाज्ञवल्क्यः ॥ अन्तःप्रकरणं तस्य अपसव्येन पीडत ॥ पीडयित्वा
ततः पश्चाज्जपं कुर्यात्सुविस्तरं ॥ अग्रकरणं गार्ग्योच्छिष्टसमीपान्तविकरणं ॥
तेन दक्षिणामुखत्वादि असंस्कृतप्रमीतत्वाद्यदेशाच्चे तथा योगिनीपोनं त्रः ये केचास्म
त्कुले जाता अपुत्रा गोत्रिणो मृताः ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकं इति पीडयि
त्वेत्यादिनादर्शितो जपस्थदोगविषयः ॥ कात्यायनादिभिरनविधानात् गोभिलसंबंधा

ता.१

मा० ८०

अ हरिहरस्तु वाजसनेयिनां जपानांतरमेतदनुष्ठानेनैवाजपीयमज्ञोऽस्तीति मित्यस्यापि सिद्धि
माह ॥ अथ तर्पणोत्तरकर्म ॥ तत्र विष्णुपुराणे ॥ आचम्य च ततो दद्यात्सूर्याय सलिलांज
४१ लिं ॥ नमो विवस्वते ब्रह्मन्भास्वते विष्णुतेजसे ॥ जगत्सवित्रे शुचये सवित्रे कर्मदायिने ॥
कात्यायनः ॥ निः पीड्य वस्त्रमाचम्य ब्रह्मवैष्णवरौद्रसावित्रमैत्रवारुणैः स्वलिंगैरर्चये
५१ त् ॥ ॐ अदृश्रमस्य केतवः हंसः शुचिषदित्युपस्थाय प्रदक्षिणीकृत्य दिशश्च देवताश्च ब्रह्माग्निपृथिव्योष
धिवाचस्पतिविष्णुमहद्भ्योऽद्भ्योऽपांपतये वरुणाय नम इति सर्वं त्रसे वर्चसेति मुखं विमृज्य
देवागातुविद इति विसर्जयेदेष स्नानविधिः ॥ तल्लिंगैर्ब्रह्मादिप्रकाशकैरर्चयेदिति ब्रह्मा
दीनिति शेषः एषां च मंत्राणां पुष्पैरेव ॥ तथा च योगियाज्ञवल्क्यः ॥ ध्यात्वा ब्रह्माणमपूर्वं दैवे
तं उ समाहितः ॥ नमस्कारेण पुष्पाणि विन्यसेत्तु पृथक् पृथक् ॥ कात्यायनेनाप्यादौ सुमनस
आकृतेति सूर्याञ्जलिदानार्थं एतत्पूजार्थं च पुष्पोपादानमुक्तं ॥ आवाहनमित्यादि वि
ष्णुपूजाप्रकारांतरं योगियाज्ञवल्क्यमते रावं सावित्रैर्मैत्रैर्वारुणैरिति सावित्र्यादि मंत्र
वत्कृत्वांतत्वमतएव ॥ कात्यायनेन ब्रह्मादीनां समासेनोक्तत्वात् ॥ एकैकपरत्वेऽपि वकृत्वो
पपत्तेः ॥ दिशश्चेति चकारान्नमस्कृत्येत सर्वत्रापि संबध्यते देवतादिशामेतान्नकेचिन्न
॥ स्तुतद्दिशादिशब्दमनादृत्य प्राच्यादिपदेन दिग्नमस्कारं इंद्रादिपदेन दिग्देवतानमस्कारं राम ४१
कुर्वंति ॥ ब्रह्माग्नीत्यादौ समासनिर्दिष्टेष्वपि पृथग्नमस्कार्यत्वं नम इति सर्वत्रानुषंग ॥

रात ॥ मरुद्भ्य इति त्रिलतस्यैव नमस्कार्यं ॥ ॐ अग्ना इति पृथग्पापादानं ए वस्नानविधिरित्युप
संहार एतत्पर्यन्तं स्नानप्रयोगानुवर्त्तनार्थं ॥ एतस्मिन्प्रयोगे वप्रपंचितं ॥ अत्र प्रजाप्रकार: ब्रह्म
यज्ञानं पुरस्ताद्विसीमतः सुरुचो वेन आव: ॥ स बुध्न्या उपमा अस्य विष्ठा: सतश्च योनिमसतश्च
विव: ॥ ॐ ब्रह्मणे नमः ॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे ॥ ॐ विष्णवे नमः
ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः बाहुभ्यामुत ते नमः ॥ ॐ रुद्राय नमः ॥ ॐ आकृष्णेन रजसा
वर्त्तमानो निवेशयन्नमृतं मर्त्यं च ॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥
ॐ सवित्रे नमः ॥ ॐ मित्रस्य चर्षणीधृतो वो देवस्य सानसि द्युम्नं चित्रश्रवस्तमं ॥ ॐ मित्राय न
मः ॥ ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय त्वामवस्युरा चके ॥ ॐ वरुणाय नमः ॥ इति ब्रह्मादीन्सं
पूज्य ॥ ॐ अग्ने हुताम स्यै कतवो निरस्मयो जनो अनु भाजंतो अग्नयो यथा ॥ ॐ हंसः शुचिषद्व
सुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं
तं बृहत् ॥ इत्याभ्यां सूर्यमुपस्थाय दक्षिणी कृत्यादित्याय नमः इत्यादि त्वं नमस्कृत्य दिग्भ्यो नमः
दिग्देवताभ्यो नमः ॥ ब्राह्मणो नमः ॥ अग्नये नमः ॥ पृथिव्यै नमः ॥ ॐ ओषधिभ्यो नमः ॥ वनस्पतये नमः
॥ विष्णवे नमः ॥ मरुद्भ्यो नमः ॥ अद्भ्यो नमः ॥ प्रजापतये नमः ॥ वरुणाय नमः ॥ इति नमस्कृत्य ॥
ॐ सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सं शिवेन ॥ त्वष्टा सुदत्रो विदधातु रायोनुमा
र्ष्टु तन्वो यद्विलिष्टं ॥ इति जपन्स जलकरद्वयेन मुखं संस्पृश्य ॥ ॐ देवा गातुविदो गातुं वि

श्रा०दृ०

त्वा गातुमिति मनसस्पत इमं यज्ञं स्वाहा वाते धा इति सर्जयेत् ॥ अथ योगियाज्ञवल्क्यः प्रक्षा
ल्य तीरदेशं तु गत्वा स्वं धर्ममाचरेत् ॥ गत्वा गृहमिति शेषः ॥ तथा स्नाने त्वादिष्टमथाचम्य सोपानत्को
ऽप्यसंस्पृशेत ॥ अगस्त्यः सोदपात्रस्य कायेनैव न स्पृशेत्तसः ॥ नोदकेन द्विजातिश्रोत्रा चम्य तथा गृहे
४२ ॥ ततः कर्माणि कुर्वीत नित्यनैमित्तिकानि च ॥ पाञ्चादिरहिते तोयमुद्धृते सव्यपाणिना नैतेन
५२ प्रोक्षितां कुर्यात् स्नानपीडनेन च ॥ सोन्वरीरजितं ताम्रं मुख्यं पात्रं प्रकीर्तितं ॥ तदभावे स्मृ
तं पात्रं काष्ठतोयं तु धारितं ॥ शातातपः ॥ वह्निर्न धार्यो द्विधा पात्रस्योदकः किंचिदस्पृशात्
र ध्यागतोपि यत्नेन स्पृशेद्वह्निमानवः ॥ तथा ॥ न धौतवस्त्रैकदेशे नस्तु ध्यायमानः आहरेत्
यद्यानीतं तु सव्येन प्रोक्षयेद्दक्षिणेन तु ॥ पद्मपुराणे ॥ आचम्य विनतः सम्यगाहिले स्थगा
मागतः ॥ आहूताङ्गिः सपुष्पाभिः सतिलारुणचन्दनैः ॥ अर्घपात्रे प्रयत्नेन सूर्यनामानुकी
र्तिनैः ॥ नमोऽस्तु विष्णुरूपाय नमस्ते ब्रह्मचारिणे ॥ सहस्ररश्मये नित्यं नमस्ते सर्वतेजसे ॥
नमस्ते रुद्रवपुषे नमस्ते भक्तवत्सले ॥ पद्मनाभ नमस्तेऽस्तु कुण्डलाङ्गदभूषण ॥ नमस्ते सर्वलो
केश सुप्तानपि विबुध्यसे ॥ सुकृतं दुष्कृतं चैव सर्वं पश्यसि सर्वदा ॥ सर्वदेव नमस्तेऽस्तु प्रसीद मम राम
भास्कर ॥ दिवाकर नमस्तेऽस्तु प्रभाकर नमोऽस्तु ते ॥ एवं रविं नमस्कृत्य त्रिः कृत्वोऽथ प्रदक्षिणं ४२
॥ द्विजं गां काञ्चनं स्पृष्ट्वा ततो विष्णुगृहं विशेत् ॥ आग्नेय स्कन्दे ततः स्वप्रतिमां चापि सर्जये
त् ॥ अक्षतमन्त्रैस्तंडुलाः स्पर्शा चैतिरेत यादशी नात् ॥ अर्घपात्रे दातव्ये इति शेषः

आशयस्थं जलस्थं ॥ अथ देवपूजा ॥ तत्र विष्णुपुराणे ॥ स्नातोंजलिमुत्क्रातगोगृहार्चनं कुर्यादभीष्ट
सुरस्य जलं ॥ जलाभिषेकपुष्पाणां धूपादेश्च निवेदनं ॥ आदिपदेन गंधदीपनैवेद्यग्रहणं ॥ यमः
देवमाल्यापनयनं देवगारसमूहकं स्नपनं सर्वदेवानां गोप्रदानसमं स्मृतं ॥ ब्रह्मपुराणे
देवानां प्रतिमा यत्र घृताभ्यंगसमा भवेत् ॥ पलानि तस्य देयानि गाह्यपापंचविंशतिः
अभ्योत्तरं पलं ज्ञातं स्नाने देवे च सर्वदा ॥ द्विसहस्रपलानां तु महास्नाने च संख्यया ॥ दानखंडेपेन
सर्वासु दिक्षु निर्यातितद्घृतं ॥ ब्रह्मांगलग्नं विप्रेभ्यो वैष्णवे न प्रदीयते ॥ रुद्रांगलग्नमप्येनो
न दद्यात् सर्वं वतत्क्षालनात् ॥ शिवेभ्यो ऽप्य घदेवेभ्यो यत्तदीनेषु निक्षिपेत् ॥ विप्रेभ्यस्त्वथ तद्देयं
ब्रह्मणो यन्निवेदितं ॥ वैष्णवं सात्वतेभ्यश्च भस्मांगेभ्यश्च शांभवं ॥ सौरं गमेभ्यः शाक्तेभ्यस्ता
पिने यन्निवेदितं ॥ स्त्रीभ्यश्चादेयं मातृभ्यो यत्तु किंचिन्निवेदितं ॥ भूतप्रेतपिशाचेभ्यो यत्तु दीने
षु निक्षिपेत् ॥ प्रतिमेत्युपलक्षणं ॥ तेन लिंगे ऽपीयमेव ॥ अभ्यंगादिद्रव्यसंख्याया ऽप्येषा घृतं क्षालनं त ३
पात्रितुं धार्यं दिस्थाने पयमेव व्यवस्था ॥ एतच्च भविष्यपुराणे उक्तं ॥ ब्रह्मांगलग्नमित्यादि
नाघृतादिप्रतिपत्तिः ॥ विप्रेभ्यस्त्वथेत्यादि नादत्तेनैवेद्यादिप्रतिपत्तिः ॥ सात्वताः ब्रात्याद्वैश्या
दिलघिकस्य ॥ पंचमः सात्वतो नाम विष्णोरायतनान्यपि ॥ पूजयत्याज्ञया राज्ञां स वै दिस्यात्से
पतेद्विपः ॥ इति ब्रह्मपुराणे एवदर्शितः ॥ नापितेनैवद्याय एतच्चुतिपिक्कस्यादे ॥ पत्रकुसुमपूजाविहि
तात्परमिदं मानस्य इति देवीमाहात्म्योपलक्षणं ॥ पूजाधारमाह ॥ शातातपः ॥ भमावस्तुतथा

र्गो यदि विप्रसर्वे च देवताः ॥ तथा ॥ अप्सु देवा मनुष्याणां दिवि देवा मनीषिणां ॥ काष्ठलोष्ठेषु मूर्
खाणां युक्तस्यात्मनि देवता ॥ व्योम सूर्यं च गूजायां लिंगं शिवस्य जायां प्रतिमा सर्वदेवतानामिति स्कं
दात्तरोक्तं ॥ देवीपुराणे ॥ शुचिर्व्रतस्थधरः प्राज्ञो मौनी ध्यानपरायणः गतकामभयं द्वेषी दोषरागमा
४२ त्सर्यवर्जितः ॥ आत्मानं पूजयित्वा तु स्नातः शुद्धसितवाससा ॥ कुसुमैर्यजेद्देवान्स्वकीयासन
संस्थितान् ॥ आकल्पनाद्यैः पाद्याद्यैः रम्यपात्रेण दापयेत् ॥ रक्तपुष्पैर्दधिदूर्वांकुरैः सतिलैः सामान्यः
४३ सर्वदेवानामर्घोयं परिकीर्तितः ॥ अभावे दधिदूर्वादेर्मानेन संवापकल्पयेत् ॥ कुसुमैरिति
विहितदूर्वान्तादि कालपरं ॥ रक्तं कुंकुममिति कल्पतरुकारः ॥ अक्षता आमतंडुलाः ॥ सर्वे वि
ष्णुशिवदुर्गाणां सामान्यतः पंचोपचाराः ॥ चंदनागुरुकर्पूरकुंकुमान्यनुलेपने ॥ पुष्पाणि
गिरिवनस्थवाटिकासंभवानि सुगंधीनि विकसितानि केशकीटरहितानि ॥ अपर्युषिता
न्यस्वयंपतितानि ॥ अखंडानि ॥ आर्द्राणि च शोधितानि पत्राण्यपि दृष्टानि गंधान्यपीति वि
शेषः ॥ धूपे गुग्गुलुः सघृतः केवलो वा कृष्णागुरु वा ॥ दीपे घृतं तैलं च ॥ नैवेद्ये भक्ष्यभोज्यकंद
मूलफलान्नपानादीनि ॥ फलं पक्वमकर्षितं कम्पविद्धं ॥ पक्वान्नं वै स्वदेवार्पणं गव्यघृतस ६२
दातव्यं ॥ प्रतिदेवं स्नानादिविशेषाः पंचोपचारविशेषश्च जपस्तुतिप्राणायामप्रदक्षिणावि ४२
सर्जनविशेषाश्च विस्तारतया न लिखिताः ॥ इदानीं निषेधाः ॥ तत्र नरसिंहपुराणे शांतनुं प्र
ति नारदवाक्यं ॥ अतः प्रभृति नित्यं त्वं मालां धय महीपते ॥ नरसिंहस्य देवस्य अन्येषां च
दिवौकसां ॥ भविष्यपुराणे ॥ यथा लंघयेत्काश्चित्स्नपनं भास्करस्य तु ॥ तथा कार्यं प्रयत्नेन

लंघितं ह्यसुखावहं ॥ तमिशं नरके कर्त्ता लंघये घः शरीरवं ॥ देवीपुराणे ॥ वस्त्रंच गलविहीनं तु न पा
जंकारयेत्क्वचित् ॥ न क्वचिदिति स्नानादौ निषेधः ॥ बौधायनः ॥ परिहितमधिरूढमप्रक्षालितं
प्रावर्णं मलसंलुलितं मनुष्यसंगतं दैवताये न संप्रयुज्यात् ॥ लघुहारीतः ॥ स्नानं कृत्वा तु ये के चित्पु
ष्पं गृह्णाति वै द्विजाः ॥ देवतास्तान्नगृह्णंति भस्मी भवति दारुवत् ॥ देवीपुराणे ॥ शिवे विनर्जये
त्कुंदमुन्मत्तं वतथाहरे ॥ देवी नामर्कमंदारौ सूर्यस्य तगरं तथा ॥ दुर्गायामर्कमंदारौ विहितत्वात्
॥ देवीपदं तदितरपरं ॥ सूर्यस्यात्र तगरप्रतिषेधात् कुङ्कुमं सततं गतस्यैव ॥ भविष्यपुराणीयो
विधिः ॥ केवलविहिताभावे एवमन्यत्रापि केवलविहिताभावे विहितनिषेधोपादानं ॥ भविष्य
पुराणे ॥ कृष्णलोन्मत्तार्कका चीतमाचगिरिकर्णिका ॥ नकंटकारिकापुष्पं तथा न्यङ्कुधवर्जितं
नचाम्रातककेडैः पुष्पैरर्चनीयो दिवाकरः ॥ कृष्णलाकरनी इति प्रसिद्धा कांचीवराइ ॥ गिरिकर्णि
काऽपराजिता कंटकारिका विहितापि विष्णुप्रजायां ॥ वामनेपुराणे ॥ अरभीनीतयान्यानि
वर्जयित्वा तु केतकीं ॥ केतक्या शोककंचंपकैरिति नरसिंहपुराणीयो विधिः काम्यप्रजायां ॥ नरसिं
हमतेनौ वा शिवप्रजायां ॥ भविष्यपुराणे ॥ केतकी चाति मुक्तश्च कुंदो यूथी मदंतिका ॥ शिरीषस
र्जो वंधूककुसुमानि विवर्जयेत् ॥ अंकोलयत्रकुशानं वारजें हत रूद्रवं ॥ विभीतकानि धन्वा
नि कुसुमानि विवर्जयेत् ॥ निर्गंधीन्युग्रगंधीनि कुसुमानि विवर्जयेत् ॥ गंधहीनमपि ग्राह्यं

पवित्रं पत्कुशादिकं अतिमुक्तो माधवी लता मदंतिका सप्तपर्णकारि पुष्पाइ इतरः सिंदुवारः
तथान शल्लकीजातानां शेलानस्तु श्रासवसंभवं दद्यादकों यथमी त्मा धूपमाराधनो यतः
अन्तोऽङ्गिरिज पीलुप्रभवं तथास्त्रपादी पाधिकारे तीं अदद्यानाई सैत न तैलपरिवर्जित
४४ तान् कुर्वीत दीपइ तौ च मत्स्यकौ धर्मज्ञापते विष्णुः न नक्तं गृहीतोदकेन देवकार्यं कुर्यात्
४४ चंदनकुंकुमागुरुकर्पूरमृग मद जातीफलवर्ज्जमनुलेपनं न दद्यात् न वासो नीलरक्तं न
मलिनं सुवर्णापो प्रतिरूपमलंकरणं नो ग्रंधिपुष्पं नागंधिनकं कंटकिजं कंटकि जमपि शुक्लं सुगं
धिपं दद्यात् न रक्तं दद्यात् रक्तमपि कुंकुमं जालं लं दद्यात् न धूपार्थं जीवज्ञातं न घृत तै
लं विना किंचनदीपार्थे नाभक्ष्यं नैवेद्यार्थे भक्षेष्वपि अजामहिषीक्षीरं पंचनखमत्स्यवाराहमांसा
नि च प्रयतः सन्तु विमृश्य सर्वमेव निवेदयेत् तन्मनाः सुमना भूत्वा रक्तं च राक्षोध विवर्जितः
कुंकुमं जलजं चेति विहितरक्तपुष्पापलक्षणं तेन रक्तपुष्पतरोत्रान्यपि शमीकुशपलाशाशो
कक्करवीरपाटलापारिभद्रपुष्पाणि देयानि एते च निषेधा विष्णुपूजामुपक्रम्य विष्णुना इ रास ४४
ति निबंधिभिर्लिखिताः अत्राहुः देवकार्यमिति सामान्यवचनात्सर्वविषयत्वं न च देव
पदं विष्णुपरं संकोचापत्तेः प्रकरणाद्देवविष्णुप्राप्तौ विषयव्याप्तेः तस्मात्सर्वा ध्याये नैव विष्णु
पूजाकथनं न रक्तमित्यध्यायांतरं सामान्यविषयमिति कालिकापुराणे शिवं भास्करमंबिकां

केशवं कौशकीमपि ॥ चेतसा नार्चयन्याति देवलोकादधोगतिं ॥ कौशकी दुर्गा ॥ भविष्यपुराणे
सदा यजंति यज्ञेन सदा दानं ददंति च ॥ सदा नवा प्रभुभक्तास्ते नित्यं येर्चयंति भास्करं ॥ नरसिंहपु
राणे ॥ यस्तु प्रजपते नित्यं नरसिंहं सुरेश्वरं स स्वर्गमोक्षभागी स्यान्नात्र कार्या विचारणा ॥ भवि
ष्यपुराणे ॥ नहि लिंगात्परं किंचित्सुराणामप्यधिकं क्वचित् ॥ इति विज्ञाय यत्नेन प्रजनीयः सदा
शिवः ॥ तथा दुर्गार्चने रतो नित्यं महापातकसंभवैः ॥ दोषैर्न लिप्यते वीर पद्मपत्रमिवांभसा ॥
=अत्र च क्रमानन्निधाने पि स्वरूपं प्रजापूज्यमाना नराः तस्य पौर्णमासमप्येतु विष्णुपुराणाप स्तथैव पुरा
णायोक्तमेव ॥ नरसिंहपुराणेपि ॥ ब्रह्मयज्ञानन्तरमुक्तं ॥ ततो र्भानवेद्यातिलपुष्पजला
न्वितं ॥ उत्थाप्यार्घ्यं दत्वा तर्पयेत्तेः सः सुनियाद्यपि ॥ जलदेवं नमस्कृत्य ततो गृहगतः पुमान् ॥ विधिना
पुरुषसूक्तस्य तत्र विष्णुं समर्चयेत् ॥ वैश्वदेवं ततः कुर्याद्बलिकर्म यथाविधि ॥ =अथ वैश्वदेव
बलिकर्मणी ॥ तत्र बोडासनेपि गृह्ये वैश्वदेवादन्नादुद्धृत्य पर्युक्ष्य स्वाहाकारैर्जुहुयात् ॥ अग्ने
रोग्नेर्जापतये गृह्याभ्यः कश्यपायानुमतये ॥ इति मंतगृह्ये मारीके भीन्रपर्णाभ्याः ऽथ
ब्धे धात्रे विधात्रे च द्वार्ययोः प्रतिदिशं वायवे दिशां च मध्ये त्रीन् ब्रह्मणे अंतरिक्षाय सूर्याय वि
श्वेभ्यो देवेभ्यो विश्वेभ्यो भूतेभ्यः स्त्रीभ्यानुचरतउषसे भूतानां च पतये परं पितृभ्यः स्वधा नम

ष्पा॰ ८॰ इतिदत्तत्वात्ः पात्रंनिर्निज्योत्तरापरस्यांदिशिनिनयेत्यत्रैनत्तदाहइति॥ वैश्वदेवादित्या न्मेव्यपदे
शः विश्वेभ्यो देवाः नाकबलिसंबंधात्॥ यद्यपिदेवतांतरमपिवस्तीतितथाप्यैकदेशेनव्यवहारः
॥अतएवहोमेप्यास्मिन्वैश्वदेवपदंगौतमादिकल्पे होमेपि विश्वेदेवसंबंधाद्वा ॥अन्नाद्धूही
४५ त्वेतिशेषः॥ पर्युक्ष्य अग्निमितिशेषः॥ विश्वादिसंवादात्॥ एवंचपर्युक्षणस्यहोकारस्य च होम
५५ सामान्यधर्मतयोक्तस्यापिपुनरुपादानं॥ एषएवविधिर्यत्रक्वचिद्धोमइत्यत्रगो(?)तरसामान्य
धर्मनिषेधार्थं॥ ब्रह्मणइत्यादिनाप्रत्येकं होमदेवतानिर्देशः॥ अनुमतयइतिकारो होमसमा
प्त्यर्थः॥ त्रीन्बलीनितिशेषः॥ मणिक(?) प्रविवरणापर्जन्यायाद्भ्यः पृथिव्यै इतितेनतस्यदेशेबलि दे(?)
दानमितिसिद्ध्यति॥ धात्रे विधात्रे द्वारयोःबाह्यप्रदेशयोः॥ प्रतिदिशंगृहस्यपूर्वदक्षिणापश्चिमोत्त
रासु॥ दिशांआशानेव॥ नकारात्प्रतिदिशमितिसंबध्यते॥ मध्येगृहस्यब्रह्मणइत्यादिनापं
त्रीनित्यत्रदेवताभिधायकंतेषांब्रह्मादिबलीनामुत्तरतः॥ उत्तरस्यांदिशि॥ अपरंप्रतीतं॥
तेनविश्वेदेवादिबलयउत्तरस्यांदिशिउत्तरोत्तरंदातव्याइतिसिद्ध्यति॥ उत्तरापरावीतादिक हदि
अत्रवदेति॥ अयंविधिःसाग्नेरेव॥ अग्न्यादिर्गौतमेनोक्तो होमःशाकलएवच॥ अनाहि ४५
ताग्नेरप्यभ्युद्यतेबलिभिःसहेतिवाक्येनिरस्ते॥ प्रकान्तोरानिधानान्न यच्छदोगपरिशि
ष्टेऽवगतःछंदोगविषयंप्रकारान्तरं॥ सर्वसाखावैप्रत्ययमेकंकर्मेतिन्यायेनसर्वगोचरत्वात्॥

किंच॥ यदीदंछंदोगविषयं तदा निरग्नि वाजसनेयिनां वैश्वदेवो न स्यादेव॥ ज्ञापकाभावात्॥
किंच मत्लौकेऽग्नीनिति श्रवणात्॥ निरग्नेश्च मणिकाभावात् साग्निविषयत्वेन॥ तदप्युक्तं
वैश्वदेवं तु कुर्वीत स्वशाखाविहितं नर इति व्यासवाक्यात्॥ पारशाखिकवैश्वदेवानुष्ठानायोगा
त्॥ यद्यपि सर्वशाखाप्रत्ययमेकं कर्म तथापि स्वशाखाविहितं हि कर्म्म विज्ञापनान्यशाखाया
मनुष्ठानं॥ यत्तु कर्म्म स्वशाखायां न विहितं स्वशाखाविहिताविरुद्धं तत्पारशाखिकमप्यनु
ष्ठेयं॥ तदुक्तं छंदोगपरिशिष्टे॥ स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं तु यः॥ कर्तुमिच्छति
दुर्मेधा मोघं तत्तस्य यत्कृतं॥ यन्नाम्नातं स्वशाखायां पा[illegible]क्यमविरोधि यत्॥ विद्वद्भिस्तद
नुष्ठेयमग्निहोत्रादिकर्मवदिति॥ शाखोक्तोपविशेषः॥ गृह्योक्तोयमिति चेत्॥ न॥ स्वशाखा
मितिस्तु शाखानुगतमात्रत्वविवक्षितत्वात्॥ बहुलं वा स्वगृह्योक्तं यस्य कर्म प्रकीर्त्तितं
॥तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत्॥ इति गृह्यपरिशिष्टे तत्रापि विशेषविधानात्
॥ तस्मान्निरग्निवाजसनेयिनामपि गृह्योक्त एव कल्प इति॥ मणिकस्य तूदपात्रविशेषस्य च
लौकिकत्वादनग्निनाप्युपादानमस्तु॥ अनग्निपक्षे उदकुंभ एवास्तु अप्सूदकुंभ इति गौत
माभिधानात्॥ उदपात्रमात्रोपलक्षणं वा मणिकशब्दं॥ उदपानसन्निधावित्यापस्तंबवचना
त्॥ ननु प्राप्यकाभावः॥ सामान्यविधेरेव ज्ञापकत्वात्॥ तथाचोदाहृतं तर संवर्त्तः॥ ततः पंचम

महायज्ञान् दहरहर्द्विजः ॥ न हापयेत्तान् प्राज्ञः स्वपंते हि गृहाविह ॥ शतपथश्रुतः ॥ पंचैव महायज्ञा
स्तान्येव महासत्राणि भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्म यज्ञ इत्यहरहर्भूतेभ्यो बलिं ह
रेत्तथैतं ॥ भूतयज्ञं समाप्नोत्यहरहर्दद्यादोदपात्रात्तथैतं मनुष्ययज्ञं समाप्नोत्यथ ब्रह्मयज्ञः
स्वाध्यायो वै ब्रह्मयज्ञः तस्य वा एतस्य ब्रह्मयज्ञस्य वागेव जुहूर्मन उपभृच्चक्षुर्ध्रुवा मेधा स्रु
वः सत्यमवभृथः ॥ स्वर्लोक उदयनं यावन्तं ह वा इमां पृथिवीं वित्तेन पूर्णां ददल्लोकं जयति त्रि
स्तावन्तं जयति ॥ भूयांसं चाक्षय्यं य एवं विद्वानहरहः स्वाध्यायमधीते तस्मात्स्वाध्यायोऽध्ये
तव्यः ॥ मनुः ॥ पंचसूना गृहस्थस्य चुल्ली पेषण्युपस्करः कंडनी चोदकुंभश्च बध्यते यस्तु वाह
यन् ॥ तासां क्रमेण सर्वासां निःष्कृत्यर्थं महर्षिभिः ॥ पंचक्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनां ॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणं ॥ होमो दैवो बलिर्भौतो नृयज्ञोतिथिपूजनं ॥
सूना प्राणिवधस्थानं उपस्करः मार्जनी गृहोपकरणं भांडकुंडादीत्यपरे बध्यते ॥ इतीस
र्थे ऽपार्थत्वात् ॥ अथवा बध्यते हिंसाजन्यदुरितेन संबध्यते इत्यन्ये चेत्यर्थः ॥ वाहयन् प्रवर्त्त
यन् ॥ तासामित्यादिना एतत्पापक्षयार्थं पंचयज्ञा इत्युक्तं ॥ एतच्चानुवादमात्रं ॥ क्रतावहरहः
म्नाते जीवदधिकारावगमात् ॥ अत्रापि ब्रह्मयज्ञमिति श्रवणात् ॥ अथवा अर्थवादास्ते ना
जनितपापक्षयोपि ॥ एवं च स्वर्गापवर्गयोः सिद्धिः पाकयज्ञे प्रवर्त्तत इति व्यासादपि कलौ

तरमिति प्रत्येकमपि फलमस्ति ॥ तथा च हारीतः ॥ यद्देवेभ्यो जुहोति देवलोकं तेन जयति ॥ यत्पि
तृभ्यः पितृलोकं तेन जयति ॥ यत्स्वाध्यायमधीते ऋषिलोकं तेन यद्भूतेभ्यो बलिं हरति भू
तलोकं तेन ॥ मनुष्य ॥ धनं यशस्यमायुष्यं स्वर्ग्यं चातिथिपूजनं ॥ पितृयज्ञप्रकारांतरं छंदो
गपरिशिष्टे ॥ श्राद्धं वापि न यद्यतः स्यात्पितृभ्यो बलिरेव च ॥ पंचयज्ञप्रकारांतरमाह मनुर्वसि
ष्ठदेवलाः ॥ देवतातिथिभृतानां पितॄणामात्मनश्च यः ॥ न निर्वपति पंचानामनुपस्थन्न स
जीवति ॥ तदेवावाक्यानां सामान्यविषयत्वे साग्निनिरग्निगृहस्थमात्रविषयतेव ॥
नयमन्वादिभिर्वैश्वदेवहोमे आवसथ्याग्निविधानादनग्नेरनधिकारः ॥ लौकिके वै
दिके वापि हुतोच्छिष्टे जले क्षितौ ॥ वैश्वदेवं तु कुर्वीत पंचसूनापनुत्तये इति शातातपे
नाधारांतरस्यापि विहितत्वात् ॥ वैदिके आवसथ्याग्नौ ऽकृतो च्छिष्टे अन्येन होमं कृत्वा
त्यहो ॥ अंगिराः ॥ शालाग्नौ तु पचेदन्नं लौकिके वापि नित्यशः यस्मिन्नग्नौ पचेदन्नं त
स्मिन्होमो विधीयते ॥ व्यस्यापर्षः ॥ साग्निना पाको होमश्चावसथ्याग्नौ वैवकर्त्तव्यः
निरग्निना लौकिक इति छंदोगपरिशिष्टे ॥ परापाकृतिर्द्वी दर्शापर्वपूर्ण कारसादिनाचैव
सुचमात्र हरिका ॥ देवेन तीर्थेन च हूयते हविः स्वंगारिरिगास्तर्निषि उग्रपावके ॥ तथा
हविष्ये युपवामुष्णं स्तदनु व्रीहयः स्मृताः ॥ माषकोद्रवगौरादीन्सर्वालाभेपि वर्जी

र्जयेत् ॥ गौरः सितसर्षपः ॥ आपदपदेन चणकचीणकमाषकोद्रवमसूरकुलत्थोऽग्राग्रं लूचिर्जमिति शेरव
लिखितो नोकपरिग्रहः ॥ आपस्तम्बः ॥ न क्षारलवणं होमे विद्यते तथा परान्नसंसृष्टस्य च हविष्यस्यान
होमः ॥ तथा नस्त्री जुहुयान्नानुपनीतः ॥ एतत्साग्नेः प्रवासे स्त्र्यादिसन्निधाने सति अन्यत्र
४७ सत्यभावात् निरग्नेस्तु स्वकर्तृक एव वैश्वदेवः तथा आर्षीप्रपतौ वैश्वदेवान्नस्यासंस्कृतैः
॥ भार्याकाशेत्तव धुमित्रिमुखोन्नं वर्जयेत् ॥ केशानंग नास्त्यलभ्यापउस्ट शैत ॥ आर्यासे
वर्तिका ॥ आपस्तम्बः ॥ भोजनं हवनं दानमुपहारः प्रतिग्रहः ॥ बहिर्जानु न कार्याणीति तथा च
मनुस्मृतौ ॥ छन्दोगपरिशिष्टे ॥ गृहस्थश्च हुते चैव पात्रे संपर्कस्य दारुभिः ॥ न कुर्याद्दन्तधावनं
कुर्यात् त्वग्व्यजनादिभिः ॥ मुखेनैव धमत्याग्निं मुखाद्ध्येषोऽभ्यजायत ॥ न मुखेनेति यज्ञाख्ये
लौकिके भोजने तितरत् ॥ वायुपुराणे ॥ दाने प्रतिग्रहे होमे भोजने बलिरेव च ॥ सांगुष्ठेन सदा
कार्यं मासुरो ह्यन्यथा भवेत् ॥ याज्ञवल्क्यः ॥ देवेभ्यस्तु हुतादन्नाच्छेषाद्भूतबलिं हरेत् ॥
अन्नं भूमौ श्वचाण्डाल वायसेभ्यश्च निक्षिपेत् ॥ भ्यादिबलीनां पृथक् निर्देशाद्भूतयज्ञ
बहिर्भावः ॥ श्रौतस्मार्तादिती पाधिकारे ॥ हारीतः ॥ मार्जनार्चनबलिकर्म भोजनानि देवेन राम
॥ छन्दोगपरिशिष्टे ॥ नावरार्ध्यो व लायो भवति महाभाजोरकावलोत्तमारागात् ॥ एकत्र ४७
चेदविशङ्कं स्या भवति शतिरेतरासंयुक्तात्स्या ॥ अवरार्ध्य न ना ॥ एकत्रचेदित्यादि नाना नास्या

नैव बलिदानसंभवे एकस्मिन्नेव स्थाने यदा बलयो दीयंते तदा अपि प्रक्रमः सभ्य बहिताः इतरेतर
संयुक्ताश्चापरस्परसंयुक्ताश्च दातव्याः इत्यर्थः ॥ अस्मिन्नपि पक्षे धात्रादिबलिषु द्वारादिकल्पनीयं
आपस्तंबः ॥ बलीनां तस्य तस्य देशस्य संस्कारः ॥ हस्तेन परिमृज्यावोक्ष्य न्युप्य प्रक्षालनमिति सेचनं तस्य
तस्याद्भिः प्रत्येकं मार्जनादि ॥ अवोक्ष्यास्मिन्नुप्य बलिं दत्वा परिषेचनं बलेरुपरिसेकः ॥ बली
न्युप्ता पूर्वोक्तोपरिषिंचेत् ॥ पिंडवत्साक्षिमाच्रति पत्तिः पिंडवदनुलादि प्रवृत्तेपरां ॥ पञ्चिमान्तेति मात्र
ति पत्तिः पितृबलिप्रतिपत्तिः इति विरुद्धात् ॥ तदप्युक्तं सर्वबलिप्रतिपत्त्याकांक्षा पावि घमानला
त् ॥ स्त्रीलिंगानुपपत्तेः अस्त्री समासेनान्तरापत्तेश्च ॥ तथा अनुक्तेन नम इति बलिदानं विधीयते
तथा स्वधाकारेण निर्वपेत् पित्र्यबलिमतः सदा तमप्येकेन नमस्कारैः कुर्वते नेति गौतमः एकइ
ति शाखांतराभिप्रायं अत एव स्वधा नम इति वाजसनेयि गृह्ये नमस्कारोपि पठितः नेति गौ
तम इति पूर्वोक्तानां नमस्कारनिषेधः ॥ तथा सायंप्रातर्वैश्वदेवः कर्त्तव्यो बलिकर्मचः अनश्नतापि
सततमन्यथा किल्बिषी भवेत् ॥ सायमिति पुनः पाके सति ॥ तथाच विष्णुपुराणे ॥ पुनः पाकमु
पादाय सायमप्यवनीपते वैश्वदेवनिमित्तं वै पत्न्या मंत्रवलिं हरेत् ॥ तत्रापि श्वपचादिभ्यस्तद्वो
वान्नापवर्जनमिति ॥ मनुः सायंत्वन्नस्य सिद्धस्य पत्न्यमंत्रं बलिं हरेत् इदं पत्नीकर्तृकं बलिह
रणं यजमानानुपस्थितौ ॥ अत्र भ्रातादीनामपि भक्तानां विभक्तानामपि संसृष्टानामनुबंधेनैकेनैव
पाकयज्ञाः कर्त्तव्याः ॥ यदाह ॥ एकपाकेन वसतां पितृदेवद्विजार्चनं एकं भवेद्विभक्तानां तदेवस्याद्गृहे
गृहे ॥ एकपाकेन वसतां भिन्नपक्वस्य संसृष्टिनामप्यभिधानात् ॥ विभक्तानामपि द्रव्यपार्थक्य

श्रा०द०

परं देवार्चनमन्त्रवैश्वदेवः ॥ अत्र होमात् प्राक् स्नानाद्यादिना वह्निप्रज्वलनं कर्तव्यं ॥ तदुक्तं मार्कंडे
यपुराणे ॥ संप्रज्वाल्य ततो वह्निं दद्यादाहुतयः क्रमात् इति ॥ अथ प्रयोगः ॥ प्रज्वलिते समिद्धे ग्नौ तदभा
वे जले तदभावे भूमौ पाकदग्धसुवृत्तफलमूलादिना वा पंचाहुतीर्जुहुयात् ॥ ॐ ब्रह्मणे स्वाहा ॥
४८ ॐ प्रजापतये स्वाहा ॥ ॐ गृह्याभ्यः स्वाहा ॥ ॐ कश्यपाय स्वाहा ॥ ॐ अनुमतये स्वाहा ॥ ततो हुतशेषा
५८ न्नेन बलिदानं ॥ ॐ पर्जन्याय नमः ॐ अद्भ्यो नमः ॥ ॐ पृथिव्यै नमः ॥ इत्युदपात्रसन्निधौ ॥ ॐ धा
त्रे नमः ॐ विधात्रे नमः ॥ इति द्वारयोः ॥ ॐ वायवे नमः ॥ इति प्रतिदिशं ॐ प्राच्यै नमः ॐ अवाच्यै नमः ॥
ॐ प्रतीच्यै नमः ॥ ॐ उदीच्यै नमः ॥ इत्यपि प्रतिदिशं ॥ ॐ ब्रह्मणे नमः ॥ ॐ अंतरिक्षाय नमः ॥ सूर्या
य नमः ॥ इति मध्ये ॐ विश्वेभ्यो देवेभ्यो नमः ॥ ॐ विश्वेभ्यो भूतेभ्यो नमः ॥ ॐ उषसे नमः ॥ ॐ भूता
नां पतये नमः ॥ इति उत्तरोत्तरं ॥ ततः प्राचीनावीती दक्षिणामुखः पतितवामजानुः पितृतीर्थेन
दक्षिणस्यां दिशि ॐ पितृभ्यः स्वधा नम इति दद्यात् ॥ ततो बलिशेषान्नजले तत्पात्रं प्रक्षाल्य
यक्ष्मैतत्ते निर्णेजनं नम इति वायव्यां दिशि दद्यात् ॥ गृहद्वारादौ दानासंभवे ग्नेः पश्चिम
तश्चतुरस्रमंडले धात्रादि बलिदानं ॥ पञ्चबल्यनंतरं विष्णुपुराणे ॥ ततोन्यदन्नमादाय भूमि
भागे शुचौ नरः ॥ दद्यादशेषभूतेभ्यः स्वेच्छया तु समाहितः ॥ देवा मनुष्याः पशवो वयांसि सिद्धाः
सयक्षोरगदैत्यसंघाः ॥ प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छंति मयात्र दत्तं ॥ पिपील राम ४८
काः कीटपतंगकाद्या बुभुक्षिताः कर्मनिबंधबद्धाः ॥ प्रयांतु ते तृप्तिमिदं मयान्नं तेभ्यो विसृ

ऽपि सुखिनो भवंतु । येषां न माता न पिता न बंधुर्नैवान्नसिद्धिर्न तथान्नमस्ति । तत्तृप्तयेन्नं भुवि दत्त
मेतत्प्रयांतु तृप्तिं मुदिता भवंतु । भूतानि सर्वाणि तथान्नमेतदहं च विष्णुर्न यतोन्यदस्ति । तस्मादहं
भूतनिकायभूतमन्नं प्रयच्छामि भवाय तेषां । चतुर्दशो भूतगणो य एष तत्र स्थिता येऽखिलभूत
घा । तृप्त्यर्थमन्नं हि मया विसृष्टं तेषामिदं ते मुदिता भवंतु । इत्युच्चार्य नरो दद्यादन्नं श्रद्धासम
न्वितः । भुवि भूतोपकाराय गृही सर्वाश्रयो यतः । श्वचांडालविहंगानां भुवि दद्यात्ततो नरः । इदं च
काम्यबलिदानं सर्वेषां साधारणं । उपसंहारे प्रमाणाभावात् । एवं श्वचांडालविहंगानामि
दमपि सर्वसाधारणं बहुभिरभिधानात् । मनुः । शुनां च पतितानां च श्वपचां पापरोगिणां । वा
यसानां कृमीणां च शनकैर्निक्षिपेद्भुवि । व्यासः । ऐन्द्रवारुणवायव्याः सौम्या वै नैर्ऋताश्च ये ।
वायसाः प्रतिगृह्णंतु भूमौ पिंडं समर्पितं । श्वानौ द्वौ श्यामशबलौ वैवस्वतकुलोद्भवौ । ता
भ्यां पिंडं प्रयच्छामि स्यातामेतावहिंसकौ । दत्वानेन विधानेन बलिं पश्चादुपस्पृशेत् । वाय
दिभ्यो भूमौ दत्वा ब्राह्मणान्न भोजयेत्पित्र्यं बलिदानं तत्र वसिष्ठः । श्रोत्रियायान्नं दत्वा
ब्रह्मचारिणे तदनंतरं । पितृभ्यो दद्यात् । एतच्च तस्मिन्काले श्रोत्रियब्रह्मचारिणोरुपस्थि
तौ । नान्यथा पूर्ववाक्याद्बहुत्वं नंतरमेव । अथ नित्यश्राद्धं । तत्र भविष्यपुराणे । अहरहः
क्रियते यत्तु तन्नित्यमिति कीर्त्यते । विश्वेदेवविहीनं तदशक्तावुदकेन तु । विश्वेदेवविहीने

विश्वेदेवश्राद्धविहीनं ॥ मनुश्चैवशातातपः ॥ दद्यादहरहः श्राद्धं अन्नाद्येनोदकेन वा ॥ पयोमूल
फलैर्वापि पितृभ्यः प्रीतिमावहन् ॥ संदेहपरिच्छेदे ॥ अस्यैकमात्रापेक्षितं पित्र्यज्ञार्थसिद्धये ॥
तथा अनुद्धृत्य यथाशक्त्या किंचिदन्नं यथाविधिः ॥ पितृभ्योथ मनुष्येभ्यो दद्यादहरहर्द्विजः ॥ पितृ
भ्य इदमुक्त्वा स्वधाकारं च कारयेत् ॥ मनुष्येभ्यो ब्राह्मणेभ्य इदमित्युक्त्वा मिलितदेवता ॥ नो नित्यश्राद्ध
इति केचित् ॥ मत्स्यपुराणे ॥ नित्यं तावत्प्रवक्ष्यामि अर्घ्यावाहनवर्जितं ॥ नित्यं श्राद्धमदैवं स्यादर्घ्यपिंड
विवर्जितं ॥ ब्रह्मसौर्यादिनिवृत्तिरानारात् ॥ अथ प्रयोगः ॥ ॐ अद्य नित्यश्राद्धमहं करिष्ये इति
वाक्यं कृत्वा ॥ गायत्रीदेवताभ्य इति जप्त्वा पुंडरीकाक्षस्मरणेन श्राद्धद्रव्याणि सिंच्य ॥ अद्यामु
कगोत्र पितर अमुकशर्मन् इदमासनं ते स्वधेति ॥ प्राचीनावीती पतितवामजानुः पितृतीर्थे
न जलतिलसमेतं द्विगुणाकुशत्रयेणापि त्रे दद्यात् ॥ एवमेव पितामहप्रपितामह मातामहप्रमा
तामहवृद्धप्रमातामहेभ्य आसनं दद्यात् ॥ ततो अपहता असुरा इत्यादिना तिलान् विकीर्य
आयंतु न इति जपित्वा ॐ अद्यामुकगोत्र इति सर्ववत् ॥ एतानि गंधधूपदीपनैवेद्यानि तुभ्यं
स्वधेति यथासंभवं गंधादि दद्यात् ॥ ततः पात्रमालभ्य पृथिवी तेत्यादि जपित्वा इदं विष्णु
रित्यादि नांगुष्ठमन्नेपि संयोज्य ॥ ॐ अद्यामुकगोत्रेभ्य इदमन्नं सव्यंजनं सतिलं सजलं तुभ्यं
स्वधेति संकल्प्य प्रत्येकमुत्सृजेत् ॥ ततो यथाशक्ति पवित्राणि जपेत् ॥ ततस्तदन्नं ब्राह्मणाय प्रतिपा

तिपादयेत ॥ ब्रह्मतोषपेवे शापदेस्याग तत्र स्त्रा घधिक मिति प्रयोगः ॥ भिक्षा दानं तु पदे व यतिब्र
ह्मचारिणोरुपस्थितिस्तदेन कर्तव्यं ॥ नरसिंहपुराणे ॥ भिक्षां च भक्तये दद्यात् विष्णु ब्रह्मचारिणो
कल्पितादन्नादुध्धृत्य सव्यंजनयुतानि च ॥ अक्रतेवैश्वदेवेपि भिक्षो च गृहमागते ॥ उद्धृत्य
वैश्वदेवार्थं भिक्षां दत्वा विसर्जयेत ॥ गौतमः ॥ स्वस्ति वाच्य भिक्षा दानमप्पूर्वं ॥ मार्कंडेयपुरा
णे ॥ ग्रास प्रमाणा भिक्षास्यादग्रं ग्रास चतुष्टयं ॥ अग्रं चतुर्गुणं प्राहुर्हतं कारं द्विजोत्तमाः ॥
भोजनं हंतकारं वा अग्रं भिक्षामथापि वा ॥ अदत्वा तु न भोक्तव्यं यथा विभवमात्मनः ॥ अग्रं
पुष्कलमित्याहुः ॥ विष्णुपुराणे ॥ दद्याच्च भिक्षात्रितयं ब्राह्मणब्रह्मचारिणां ॥ स्वेच्छया तु भो
दद्याद्विभवे सत्यवारितं ॥ पाखंडानुपक्रम्य ब्रह्मपुराणे ॥ तेभ्यो देयं गृहाद्वहिः ॥ विष्णुः ॥
भिक्षां च भिक्षवे दद्याद्विधिवद्भिक्षादानेन गोप्रदान फलमाप्नोति भिक्षुकाभावेना ग्रंगो
भ्यो दद्यात् अग्नौ वा क्षिपेत ॥ भुक्ते प्यन्ने विद्यमाने भिक्षुकं न प्रत्याचक्षीत ॥ ब्रह्मपुराणे
॥ यः पात्रपूरणीं भिक्षां यतिभ्यः संप्रयच्छति ॥ विमुक्तः सर्वपापेभ्यो नासौ दुर्गतिमाप्नुया
त ॥ यमः ॥ हस्तादत्ता च या भिक्षा व्यंजनं सलिलानवा ॥ भुक्त्वा त्वशुचिता याति दाता स्वर्गं
न गच्छति ॥ देवलः ॥ सायं प्रातर्गृहद्वारं भिक्षार्थं नावघट्टयेत् ॥ भिक्षुक वारणार्थं गृह
द्वारं नावरुध्यादित्यर्थः ॥ अथ ब्रह्मपुराणे ॥ सौरभेय्यः सर्वहिता पवित्राः पुण्यराशयः
यः तिगृह्णंतमे ग्रासं गावस्त्रैलोक्यमातरः ॥ दद्यादनेन मंत्रेण वा ग्रास सदैव हि ॥ सदैव हि त्व

श्रा०५० ऽकेति त्वाधिकारः । महाभारते व्यासमुखिं परावेद व्यासेवत्सरेत्वयः । अकृतोऽस्य यमाहारस्व
र्गलोकं सगच्छति । अकृत्वोऽस्य यमाहारमिति श्रवणाद्भोजनाग्रागतः सदानं न तु तत्र कालनिय
५० मः । फलश्रवणाच्चात्र काम्यस्याधिकारोपि । भविष्यपुराणे तृणोदकेन संयुक्तं प्रदद्याद्भगवाह्निकं ।
50 कपिलाशतदानेयत्फलं विद्यान्नशंसयः । पंच भूतेति शिवेपुराये पवित्रे सर्वसंभवे प्रतीक्ष्व
मेमयादत्तं सौरभेयनमोस्तु ते । गवाह्निकं गवायदत्तमुच्यते । पंच भूत इत्यादिना गवाह्नि
कदानमंत्रः । गोग्रासदानमंत्रस्तु सौरभेय्यः इत्यादि प्रागुक्तः । अथातिथिपूजा तत्र वसिष्ठः
पितृभ्योदद्यात्ततोतिथीन्पूजयेत् । एवं चात्र नित्यश्राद्धानंतरं अतिथिपूजाविधानात्
स्मृत्यंतरे वैश्वदेवाद्यागतो नातिथिरित्येवं परं । तथा च पाराशरहारीतातपौ । प्रियो वाय
दि वा द्वेष्यो मूर्खः पंडित एव वा । वैश्वदेवे तु संप्राप्ते सोतिथिः स्वर्गसंक्रमः । हारीतः सर्वास्य
देवताश्च हानम्यागच्छंति यस्येवं ब्राह्मणोविद्वान् गृहे न भुङ्क्तेति । तमनन भुति इति ः आ
णादेवता अपक्रामंति । अथ बृहस्पतिः प्रीयते स्वागतेनाग्निरासनेन शतक्रतुः पित
रः स्वागतेः पादशौचेन भोजनेन प्रजापतिः । शातातपः । भिक्षां वा पुष्कलं वापि राम
हंतकारमथापि वा । असंभवे सदा दद्यादुदपात्रमथापि वा । पारस्करः उद्धृतान्नं ब्रा ५०
ह्मणायानने स्यादद्यादुदकं ततः इति । एवं चातिथ्यभावे अन्नेनापि ब्राह्मणो न मनुष्य
यज्ञसिद्धिः । अभ्यागतानुवृत्तौ वसिष्ठः । तं भोजयित्वोपासीत ततो गच्छंतमासीमांतमनु

व्रजेदननुज्ञाताद्वा ॥ आपस्तम्बः ॥ यानवंतमयानवान्नानुजानीयादितरं ॥ आप्रतिभाषायामासीनोनिरस्तेत
स्तांप्यानस्थन्नं ॥ आप्रतिभाषायामनुज्ञाना सू.चै ॥ विष्णुपुराणे ॥ अनितेष्वनाड्याराचेयसापंग्रहागताः
ते बागरहस्थाः सर्वेषां प्रतिश्रयो नरेवनः ॥ प्रतिश्रयः आश्रयः ॥ योनिरन्नादिदाने न जीवनहेतुः
तथा ॥ दिनातिथेस्तु विमुखो गतो यस्मात कं न्तरागं ॥ तदेवाग्निरागंतुसां स्कूर्योढविमुखे गतो ॥ सूर्योढः
स्वस्तमयसमयागतः ॥ विष्णुः ॥ प्रतिश्रयं तथा शय्यापादाभ्यागंसदीपकं ॥ प्रत्येक दानेन प्नोति गो
प्रदानसमं फलं ॥ प्रतिश्रयो वासगृहं ॥ मनुः ॥ आसनाशनशय्याभिरद्भिर्मूलफलेन वा ॥ नास्य
कश्चिद्वसेद्गेहे शक्तितोनर्चितोतिथिः ॥ आपस्तम्ब ॥ एकरात्रिं चेदतिथिं वासयेत्पार्थिवान्लोका
नभिजयति द्वितीयमान्तरिक्षांस्तृतीयां दिव्यांश्चतुर्थ्या परावतो लोकान् अपरमितामिरपरमिता
न्जयति ॥ इति विज्ञायते ॥ यमः ॥ न पृच्छेद्गोत्रचरणं देशनाम कुलं श्रुतं ॥ अपश्चान्नाभ्यागतं
विप्रं भोजनार्थमुपस्थितं ॥ चरणं शाखाविशेषव्यवस्थितः ॥ तथा ॥ गोत्रं देशकुलं विद्याम
न्नार्थं येन नेन दपत ॥ वैवस्वतेषु धर्मेषु नातःशीलनिरुच्यते ॥ तथा ॥ अपि शाकं पचानस्य शि
लोञ्छेनापि जीवतः स्वदेशे परदेशे वा नातिथिर्विमना भवेत ॥ मनुः ॥ तृणानि भूमिरुदकं
वाक्चतुर्थी च सूनृता ॥ एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥ तथा ॥ वैश्वदेवे तु निर्वृत्ते
यद्यन्योतिथिराव्रजेत् ॥ तस्याप्यन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत् ॥ वैश्वदेवे हामार्थ पाके

अपा. ६.

वैश्वदेवसिध्यर्थं तेव नाशोदर्शनात्‌ ॥ निवृत्ते वैश्वदेवे न बलिं हरेत्‌ । अतिथ्यर्थमन्नं पुनः पा
के केवलं बलिहरणानिषेधः ॥ केचिद्व्याचक्षते ॥ वैश्वदेवे हि माते अतिथ्यन्तरोपस्थितौ
५१ तस्मिन्नर्थे बलिहरणं न कर्त्तव्यमित्यर्थः ॥ तदयुक्तं बलिहरणात्पूर्वमतिथ्यन्नदाने न स्मृत्यं
तरे विरोधात्‌ । अतोऽन्यत्र बलिहरणाविरोधोऽप्यतिथ्यन्नदानमिमचिन व्याख्यानं युक्तं ॥ न बलिं
51 हरेदित्यविशेषतः श्रवणात्‌ तत एव बलिमपि न हरेदिति स्मृतिरिति व्याख्या पेक्षा ॥ अथ तिथ्याहार
दोषात्‌ ॥ पराशरशातातपौ ॥ अचिंतितमनाहूतं देशकालमुपस्थितं । अतिथिं तं विजानीयान्ना
तिथिः पूर्वमागतः ॥ देशे उपस्थितं गृहे विद्या ज्ञ्यापयत्राग्नयोऽपि वा ॥ शंखविष्णुशातातपैरुक्त
॥ कालो वैश्वदेवोत्तरः प्राग्वक्तः ॥ याज्ञवल्क्यः ॥ अधर्मो नेतिथिर्ज्ञेयः । गौतमः । असमानग्रा
मीणोऽतिथिरेकरात्रिकः ॥ एकरात्रिकस्त्वधिनागतः । सर्वेत्तु द्वितीयदिनादावपि वासनं फलाथेनु
क्तं ॥ आपस्तंबः ॥ धर्मपुरस्कारो नान्नप्रयोजनकः सोऽतिथिर्भवति ॥ धर्मपुरस्कारस्तीर्थयात्रा
दिप्रवृत्तिः । तत्रातिथिसंबंध्यते ॥ अन्नप्रयोजनकः भोजनार्थमटनशीलः ॥ मनुः ॥ ब्राह्मणस्यान
नतिथिर्गृहे राजन्य उच्यते । वैश्यशूद्रसखा चैव ज्ञातयो गुरुरेव च ॥ यदि त्वतिथिधर्मेण क्षत्रियो राम ५१
गृहमाव्रजेत्‌ ॥ भुक्तवत्सु च विप्रेषु कामं तमपि भोजयेत्‌ ॥ वैश्यशूद्रावपि प्राप्तौ कुटुंबेऽतिथि
धर्मिणौ ॥ भोजयेत्सह भृत्यैस्तौ आनृशंस्यं प्रयोजनं ॥ इतरानपि सख्यादीन्संप्रीत्या गृहमागता
२

प्रकृत्तान्नं यथाशक्ति भोजयेत्सह भार्यया ॥ कुटुंबे गृहे । आनृशंस्यं दयाप्रकृत्तय कालाः सह
भार्यया भार्यो सहितः ॥ बौधायनः ॥ सायं प्रातर्यदन्नं स्यात्तेन वैश्वदेवबलिमुपसंहृत्य
ब्राह्मणान्क्षत्रियान्विट्शूद्रानभ्यागतान्यथाशक्त्या पूजयेत् ॥ यदि बहूनां न कुर्यात् तदा एक
स्मै गुणवते दद्यात् ॥ यो वा प्रथममागतः स्यात् ॥ गौतमः ॥ ऋत्विगाचार्यश्वशुरपितृव्यमातुला
नामुपस्थाने मधुपर्कः ॥ संवत्सरे पुनः यज्ञविवाहयोरर्वाक् राज्ञश्च श्रोत्रियस्य अश्रोत्रि
यस्यासनोदके ॥ तथा श्रोत्रियेपाद्यमर्घमन्नविशेषांश्च प्रकारयेत् ॥ नित्यं वा संस्का
रविशिष्टं मध्यतोऽन्नदानमवेद्ये साधुवृत्ते ॥ विपरीते तु तृणोदकभूमिः स्वागतमेव तावता पूजा २ अन्यथाम प्रकारेण
नात्यासश्च श्रोत्रियो वेदानामेकां शाखामधीत्य श्रोत्रियो भवतीत्यापस्तंबोक्तः ॥ नित्यं या
दृशामहरहर्गृहे पच्यते मध्यं मध्यविधादेशात् अवेद्ये ऽनर्चे ॥ विपरीते ऽसाधुवृत्ते अ
नत्यासोऽनतिक्रमः ॥ आपस्तंबः ब्राह्मणायानधीयानायासनमन्नमुदकं देयं न प्रत्यु स्थिति
त्तिष्ठेत् ॥ अभिवादनायैवोत्तिष्ठेत् अभिवाद्यश्चेत् ॥ राजन्यवैश्यौ च शूद्रमभ्यागतं कर्मणि नियुं
ज्यात् ॥ अथास्मै दद्यात् राजन्यवैश्यौ चेति नत्वप्रत्युत्थाने इति तु नानुषंगः ॥ तथा सर्वान्वैश्वदेव
भागिनः कुर्वीत आश्वचांडालेभ्यो नानर्हद्भ्यो दद्यादित्येके ॥ नानर्हद्भ्य इति निषेधात्तेभ्यो दानमना
दरपक्षं ॥ अपि कीटपतंगानां श्वचांडालयोनीनां ॥ दद्यादन्नं लोकमाप्नोति प्राजापत्यं समाः

शतं इति नंदिपुराणात्कलार्धं त्वस्यैवावगमात् ॥ जाबालिः ॥ अस्नाताशी मलं भुंक्ते अजपी पूय
शोणितं । अहुताशी कृमिं भुंक्ते अदत्वा विट्भोजनं ॥ अघं स केवलं भुंक्ते यः पचत्यात्मकारणात् ॥
इंद्रियप्रीतिजननं वृथापाकं विवर्जयेत् ॥ शंखलिखितौ ॥ न भोजनार्थी पाकं शालीनवृत्तिर्विशेषेत् ॥
५२ नंदिपुराणे ॥ यो द्वादशरात्रं स्वकं तु ह्येकमन्नं सदा गृहे ॥ देवलः ॥ नाघ्रातं भोजयेद्देवं स्वगृहे स
52 तिसर्पिषि ॥ परत्र निरयं घोरं गृहस्थः प्रतिपद्यते ॥ मिष्टमन्नं स्वयं भुक्त्वा यः कदशनं लघु
ब्राह्मणान्भोजयेन्मूर्खो निरये चिरमाविशेत् ॥ वशिष्ठः ॥ मह्येद्यथाशक्ति सर्वदा सर्व
भूतानि । गृहस्थ एव यजते गृहस्थस्तप्यते तपः ॥ चतुर्णामाश्रमाणां तु गृहस्थस्तु विशिष्यं
ते मह्येत्तत्र जयेत् ॥ चत्वारो ह्याश्रमा ब्रह्मचारी गृहस्थो वानप्रस्थो भिक्षुश्चेति सर्वे गृहस्थ
मूलास्तदुपजीविनः ॥ गृहस्थस्यैव यज्ञोपादानाधिकारित्वात् ॥ दक्षः ॥ देवैश्चैव मनुष्यै
श्च तिर्यग्भिश्चोपजीव्यते ॥ गृहस्थः प्रत्यहं यस्मात्तस्माज्ज्येष्ठो गृहाश्रमी ॥ याज्ञव
ल्क्यः ॥ बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः ॥ संभोज्यातिथिभृत्यांश्च दंपत्योः
शेषभोजनं ॥ दक्षः ॥ पंचानां तथा भागे संविभागो यथार्हतः ॥ देवपितृमनुष्याणां राम
कीटानां चोपदिश्यते ॥ संविभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत् ॥ संविभागो वि ५२

भक्ष्यप्रतिपादनं ॥ अथ भोजनविधिः ॥ तत्र बौधायनः ॥ सुप्रक्षालितपाणिपादोऽप आचम्य
शुचौ संवृत्ते देशे अन्नमुपसंगृह्य कामक्रोधलोभमोहानपहृत्य सर्वाभिरंगुलीभिः शब्दम
कुर्वन् प्राश्नीयात् ॥ ब्रह्मपुराणे ॥ आसनस्थस्तु यो मोहात्तं क्तिमध्यउपस्थशेत् स सर्वेषां
तु पत्यापं तत्यज्यन्नान्ति नराधमः ॥ तस्माद्बहिरुपस्थस्य आचान्तः प्रविशेद्गृहं ॥ तथा ॥ पात्रे
स्वर्णानुरूपे पुत्रान्तत्पानुजैः सह ॥ भूम्यां पात्रं प्रतिष्ठाप्य मौनेनान्नं तु भक्षयेत् ॥ पवित्रपाणिः
पुरांपञ्च लभेत् तत्राघमर्षणं ॥ अघमर्षणजं ब्रह्मपुराणमिति सामान्याधिकारत्वं लभेत् जपेदि
त्येके तन्मतेनाघमर्षणं मुख्यमेव ॥ विष्णुपुराणे ॥ विशुद्धवदनः प्रीतो भुंजीत न विदिङ्मुख
आग्नेयीनैऋतीवायव्यैशान्याभिमुखः ॥ हारीतः ॥ नोदङ्मुखो नाधिशयने आसनेऽप्यपा
दौ अधिउपरिशयने शय्यायां ॥ आसने पीठादौ अन्नं कृत्वेति शेषः ॥ वामनपुराणे ॥
भुंजीत नोदङ्मुखो न च दक्षिणामुखो न चाप्रतीचीमभि भोजनीयं ॥ एतेउदक् दक्षिणाप्र
त्यङ्मुखनिषेधाः निष्कामस्य ॥ तथा मनुः ॥ आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः
श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं भुंक्ते उदङ्मुखः ॥ श्रियमृतमुभयत्र कामयमान इति शेषः
ऋतं सत्यं यज्ञं वा दक्षिणामुखस्य भोजनं प्रमीतमातृविषयं ॥ तथापस्तम्बः ॥ दक्षिणाग

मुखो भुंजीत ॥ आयुष्यं ह्येवं मुखस्य मातुरित्युपदिशंति ॥ यमः ॥ प्राङ्मुखोऽन्नानि भुंजीत पं
चाङ्गो वाग्यतः शुचिः ॥ आर्द्रपादस्तु भुंजानः शतं वर्षाणि जीवति ॥ पंचार्द्रः पादद्वये क
रद्वये मुखे च ॥ पुनरार्द्रोपादाने फलार्थं ॥ शंखलिखितौ ॥ चतुःकोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रिय
५२ स्य च ॥ मंडलाकृत् वैश्यस्य शूद्रस्याभ्युक्षणं ॥ ब्रह्मपुराणे ॥ चतुरस्रं त्रिकोणं च मंडलं चार्ध
53 चंद्रकं कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलं ॥ ब्रह्माद्या रुद्रदेवाश्च आदित्या वसवो मंडलांतरात् ॥
निर्दिष्टं नैरन्तर्यं यस्मात् कुर्वन्ति नान्यथा ॥ एवं ब्राह्मणादीनां भोजनकाले बलिर्देयः ॥ मंडला
र्थं यदस्मात्तन्मेतदिति चेन्न तस्यापि सावलंबनत्वात् ॥ अस्पृश्यताप्यर्थनस्कृतिरिति चेन्न
॥ असंसर्गेण तिष्ठासु स्यात् नचैवं कालभेदः सूचनाकाले पानीयकल्पत्वात् ॥ विष्णु
पुराणे ॥ प्रशस्तरत्नपाणिस्तु भुंजीत प्रयतो गृही ॥ प्रशस्तरत्नं गारुडादि ॥ मनुः ॥ पूजये
दशनं नित्यमद्याच्चैतदकुत्सयन् ॥ दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनंदेच्च सर्वशः ॥ अथ ब्रह्म
पुराणे ॥ वामेन पाणिना पात्रं गृहीत्वा भुवि संस्थितं ॥ आपोशानं तु गृह्णीयात् सार्वमयं
चरेत् ॥ अमृतोपस्तरणमसीति ॥ विष्णोरन्नमयस्य च ॥ असीमनंतरं स्वाहाकारं च राम ५२
कुर्वीत ॥ हस्तेनान्नं यथेच्छान्नं सोदकेन कदाचन ॥ तथा ॥ प्राणोपस्थं प्रपंचपूर्व

×२ तेजोऽसीति जपं स्वन्नं प्राणमेदमृतं चरेत् ॥ विष्णुपु॰

स्वाहा प्रणवसंयुता: पंचाहुतीर्जुहुयात्प्रलयाग्निनिभेस्मृति प्राणापान व्यान समानोदाना:
अत्रैव क्रमोक्त: । स्वाहाप्रणवसंयुता: स्वाहान्ता: प्रणवाद्या: । ॐ प्राणाय स्वाहा: ॐ अपाना
यस्वाहा ॐ व्यानायस्वाहा: ॐ समानायस्वाहा: ॐ उदानायस्वाहा इत्येवंरूपा: प्रलयाग्नि
निभेस्मृतिश्चेयार्थे । तथाचयाज्ञवल्क्य: । प्राणो व्यान स्तथापान: समानोदान एव च
ॐ कार स्वैस्वाहान्तै: पंचदद्यात्तदाहुती: ॥ विष्णुपुराणे ॥ पंचग्रासान्महामौनं प्राणाद्या
प्यायनाय तत् । महामौनमिति सर्वथा ध्वनि निवृत्ति रहिता । प्राणापाना समाना नामु
दान व्यानयोस्तथा । क्रमांतरेणोक्त: । एताश्च हुतयोनंदं तेन भे धा: अप्राणायस्वाहेत्ये
कयाहुत्यास्तेनन्नुप्राणान्प्रीणाति । समस्तानित्तिरे दिति हारीताभिधानात् ॥ अंगुष्ठ ना
मिकामाग्रग्रासो अन्नोनता आहुतय इति हारीत व्याख्यातार: । सर्वांगुलीभिरश्नीयादि
ति सामान्यविधेस्तु पंचग्रासस्थपितथैव । दुग्धान्नग्रासानांगिलन सामर्थ्यान्नलप्येते ॥
॥ विष्णुपुराणे ॥ प्रज्ञा द्योवृस्पचारी स्यात् पश्चान्नेनैजुहुतेवसा: प्राणाग्निहोत्रविधिश्चेदाता
चस्यास्समृद्धिमान् । भोजनविधानंतरं वैधायन: ॥ स एवमेनाद्भ्रह: सापंप्रातजुहुयादि
ति प्राणाहुत्यभिप्रायं । तथा । गृहस्थो वृस्पचारी वायो नश्नं ततपश्चरेत् । प्राणाग्निहोत्र
लोपेन ह्यवकीर्णी भवेत्तु स: । अनशनव्रताप्यभिरिता व्यामाद्भि न्नोतदेवविधानं प्राणाग्निहो

आ॰ द॰

मंत्रांस्तु निरुध्य भोजने जपेत् ॥ त्रेताग्निहोत्रमंत्रान्वै द्रव्यालाभे यथा जपेत् ॥ गृहस्थो ज्याहिता
ग्निः ॥ अनड्वान्ब्रह्मचारी च आहिताग्निस्त्रयः ॥ अश्नंत एव सिध्यंति नैषां सिद्धिर
नश्नतां इत्यापस्तंबवचनात् ॥ आगाग्निहोत्रे आगाहुतिः त्रेता गार्हपत्याहवनीयदक्षि
णाग्निरूपमग्नित्रयं ॥ द्रव्यालाभे आग्निहोत्रविहितद्रव्यालाभे ॥ मनुः ॥ सायंप्रातर्मनुष्या
५४ णामशनं देवनिर्मितं ॥ नांतराभोजनं कार्यमग्निहोत्रसमो विधिः ॥ अंतराभोजननिषेधो मू
54 लफलादन्यत्र ॥ तथापस्तंबः ॥ दिवा च न भुंजीतान्यत्र मूलफलेभ्य इति नकारार्थे ॥ छंदोगपरि पुन
शिष्टे ॥ ऋषिभिर्द्विरशनमुक्तं विप्राणां मर्त्यवासिनां ॥ सततं नित्यमहनि च तमस्विन्यां
सार्द्धप्रहरयामतः ॥ अहनीति सति संभवे पंचमाभागपरं दक्षादर्शनात् ॥ तमस्विन्यां रात्रौ
सार्द्धप्रहरयामतः ॥ अर्द्धप्रहरसहितप्रथमप्रहरे एवं च मन्वादावपि सायंप्रातश्चोतद
राम नुसाराद्यारभ्यं ॥ अथ हारीतः ॥ न काष्ठीयसे न मृन्मये न भिन्ने नावकीर्णे कार्ष्णा
यसे लोहपात्रे भिन्ने स्फुटिते अवकीर्णे मूलभोजनापवित्रीकृते ॥ मनुः ॥ न भिन्नभांडे
भुंजीत न भावप्रतिदूषिते ॥ पैठीनसिः ॥ ताम्ररजतसुवर्णशंखमुक्ताफलानामभिन्नमि
ति न दोषाय ॥ अत्र विष्णुपुराणे ॥ नासंदीस्थितेपात्रे ॥ आसंदी वेत्रादिनिर्मितमासनं राम ५४
अत्र विष्णुः ॥ न भुवि पाणौ लवणं ॥ वसिष्ठः ॥ भार्यया सह नाश्नीयात् ॥ अवीर्यवदपत्यं
भवतीति वाजसनेयिकविज्ञानमिति ॥ ब्रह्मपुराणे ॥ ब्राह्मण एव भार्यया सार्द्धं कचिद्भुंजीत वाप
ती

षि ॥ असवर्णस्त्रिया सार्द्धं भुक्त्वा पतति तत्क्षणात् ॥ ब्राह्मणीपदं सवर्णापत्न्युपलक्षणं ॥ आपस्तंब
न नावि भुंजीत तथा प्रसादे कृत भूमौ तु भुंजीत ॥ प्रसादे दारुबद्धतलं हर्म्यादि ॥ कृत इत्यत्र भूमौ तु मृदादिसंपा
दित भूमौ नावि प्रासादे च ॥ हारीतः ॥ न क्रुद्धो नान्यमना नाभिशापमनसा भुंजीयात् ॥ न शिशून्निर्भर्त्स
यन् नाशादायत्रेत्तमारोग्यः ॥ यमः ॥ अस्माति जोऽन्यजनस्य मध्येऽपि शान्त्यै कोरसग्र क्षुद्बु
द्धिः ॥ दीनैकदा दौरम्भिवीक्षमाणो व्यक्तेविषेहालाहलं स भुंक्ते ॥ देवलः ॥ एकवस्त्रो न भुंजीत कपाट
मपिधाय च ॥ कपाटमपि चाय द्वारमात्र च्यत ॥ स्वग्रामे ग्रामतो वापि सन्निकृष्टे सम्मते सति ॥ न भुं
ताशाने धीमान्स्वधर्मपि वै शोककारणात् ॥ गौतमः ॥ न भस्मानुत्संगे न तयेत न वारासौ प्रेत्याद्वा
ते दास्याहृतं दुग्धादि ॥ शंखः ॥ नाति सुक्तो ग्रासनं गच्छेत् ॥ नाग्रासं नस्यः प्रथममश्नीयात् नाघ्रे
दन्याद्र नश्वतिङ्कश्नीयात् ॥ न भुंजीतोद्धृतस्नेहं नातिसौहित्यमाचरेत् ॥ नातिप्रसंगे नाति सायं
न सायं प्रातराशितः ॥ अतिप्रसंगे स्सूर्योदयसन्निधौ ॥ अतिसायं मध्यरात्रिशायां न सायमिति सायं दिना ॥
प्रातर्भोजने नैव तृप्तः सायं पुनर्भोजनं न कुर्वीत तत्पर्यः ॥ बृहस्पतिः ॥ न स्पृशेद्वामहस्तेन भुंजा
नो न्नं कदाचन ॥ न पादौ न शिरो बस्तिं न पदा भाजनं स्पृशेत् ॥ बस्तिर्नाभ्योधोदेशे ॥ याज्ञव
ल्क्यः ॥ न भार्यादर्शने श्नीयान्नैकवासा न संस्थितः ॥ भार्यादर्शने भार्याया दृश्यमानः ॥ पश्यन्ति
ति केचित् ॥ ब्रह्मपुराणे ॥ अप्येकपंक्त्या नाश्नीयात् संबंधैः स्वजनैरपि ॥ को हि जानाति किं कस्य
प्रच्छन्नं पातकं महत् ॥ भस्मस्तंभजलद्वारमार्गैः पंक्तिं च भेदयेत् ॥ को हि जानातीत्यादिना

× नञोक्तव्यमित्युक्तं निर्देशलेतु निषिद्धेति भोक्तव्यमेव भस्मस्तोभादिनाच पंक्तिभेदाभिधाने पातकं नापि

स्मा० द०

पातकसंदेहे एकपंक्त्यां भोजने दोषो नास्तीत्युक्तं॥ महाभारते॥ पानीयं पायसं सर्पिर्मधुसक्तं भक्ष्यमपि
निरस्य स्वशोभते यानि दद्यात्कस्यचित्॥ निरस्य भुक्त्वा न यद्दद्यात् शेषमनुतिष्ठेत् तदानदेयमित्य
५५ र्थः॥ निरस्यमिति पाठे तु शेषं न धार्यमित्यर्थः॥ तथा ह ब्रह्मपुराणे॥ तिलकल्कं दधि क्षीरं जलं सौद्र
55 घृतानि च॥ न त्यजेदर्धजग्धानि शाकं स्थापयेत्कदाचन॥ सौद्रं मधु॥ अर्धजग्धानि अर्धभुक्तानि
विष्णु नग्नो ब्राह्मणोपरागे नाश्नीयात्॥ न राजव्यसने प्रविशति ताद्याग्निहोत्री यदाग्निहोत्रं हुतं मन्यते
तदाश्नीयात्॥ यदाहुतं मन्यते वैश्वदेवमपि पर्वणि यदापर्वहुतं मन्यते॥ उपरागे संतप्तीडा
यां॥ तथा न नग्नोत्कंठः न च भिन्नासनगतः॥ उत्कंठः उत्कंठासनगतः॥ तथा नाकाशे
चाकाशे गृहे दोलादिरिति हलायुधनिबंधः॥ तथा बहूनां प्रेक्षमाणानां नैकस्मिन् बहवस्त
था॥ शून्यालये वह्निगृहे देवागारे कदाचनः॥ तथा॥ शयानः प्रौढपादश्च कृत्वा चैवावं॥ का
तथा पिवेत्पाणिना तोयं॥ तथा॥ न भावदुष्टमश्नीयात् भावदुष्टं यमनः प्रसादो न भवति॥
तथा॥ नैकोमिष्टं नो हुतस्नेहं॥ नद्या वाप्यानानराः श्रोत्रिलसेवेधं न दधिराजकं नैको विदारव
टपिप्पलशणशाकं दधि शक्तू नित्यमपि राजाविद्यः॥ यमः॥ खट्वारूढो न भुंजीत नचो
त्थानः कदाचनः॥ ब्रह्मपुराणे॥ यस्तु पाणितले भुंक्ते यस्तु फूत्कारसंयुतं॥ प्रसृतांगुलिभिश्च याम ५५
तस्य गोमांससदृशं तत्॥ नाजीर्णे भोजनं कुर्यात् साधुनाति विरुद्धतः॥ हस्तस्य चरणे यथा

अशक्तस्य पंक्त्यां ×

५२

घ्राद्धि

नोच्छ प्रसादेष्या नमस्तयेत् ॥ स्मसानाभ्यांतरगतो देवालयगतोऽपि वा शयने स्थितो न भुंजीत
न पाणिस्थं न चासने ॥ न संध्ययोस्तु न मध्याह्ने नार्द्धरात्रे कदाचन। ॥ नार्द्रवासा नार्द्रशिरा। न चायज्ञो
पवीतवान् ॥ न प्रसारितपादस्तु पादारोपितपाणिमान् ॥ नावसक्थिकसंस्थश्च न च पर्यंकिकास्थितः
॥ न वेष्टितशिराश्चापि नासंदीकृतभाजनः ॥ नैकवस्त्रो दुष्टमध्ये सोपानत्कः सपादुकः ॥ न चर्मो
परि संस्थश्च न चर्मवेष्टितपार्श्ववान् ॥ अनन्तस्य जन्म कालुष्यं दुष्पक्तिं न न कुत्सयेत् ॥ ग्रास
शेषं न चाश्नीयात् पीतशेषं पिबेन्न तु ॥ शाकमूलफलेक्षूणि दंतच्छेदैर्न भक्षयेत् ॥ स नये
न्नो न्नमन्ने न निंद्यात् स्वपात्रसंस्थितं ॥ बहूनां भुंजतां मध्ये नैकोऽश्नीयात्त्वरान्वितः ॥ वृथा
न विकरेदन्नं नोच्छिष्टः कुत्रचिद् व्रजेत ॥ न स्पृशेत्स्वशिरो विप्रः स्वोच्छिष्टेनैव पाणिना
॥ प्रसृतांगुलिभिर्विस्तृतांगुलिः ॥ यानं उपानद्गृहस्थ्यादि व्यतिरिक्तं तैलादि ॥ अर्द्धरा
त्रे रात्रेरादावंते च सार्द्धैकप्रहरं विहाय मध्यरात्रे सेवमहानिशि भोजने चर्मवेष्टितपा
र्श्ववान् ॥ सन्नाहादि वेष्टितगात्र जन्म निंदितदेशाद्युत्पत्तिः ॥ कालुष्यं मलिनत्वं दुष
क्तिं दुष्पाकं ॥ दंतच्छेदैः दंतैः छित्वा छित्वा मुखप्रविष्टे तु दंतव्यवहारो न दुष्टः ॥
संचयेदित्यादि विस्तृतमोदनादि अप्रसन्नादि नान्नराशौ कुर्यादित्यर्थः ॥ मार्कंडेयपुराणे
उपघाताहृते दोषं नान्नस्योदीरयेद्बुधः ॥ उपघातोऽशौचे ॥ अंगिरा ॥ उपनीतं यदा चा

=भा०द०

५८ न्नेभोजनेसमुपस्थिते । अपीतरसमुच्छिष्टं नद्यान्नेन भोजयेत् । उपनीतमन्नं स्मै इति शेषः

शेषखिलिखतो । नतिचान्नं खादेन्न हसन्न जल्पन्न विलोकयन् । विलोकयन् इति स्तत

56 इति शेषः । देवलः । न भुंजीतोद्धृतस्नेहं गृहस्थो भोजनद्वयं । पवित्रमप्यहं घेच सर्पि राजुर

आपदं नो छिन्नाघ्रातमादद्यात न चंद्रार्कतारका निरीक्षेत । नान्नदुष्टो न स्पृशेत् । न ब्रह्मकीर्त्ति

येत् । तथा । नि: शेषं भुक्तं स्यात् अन्यत्र मधुदधिसर्पि: पयशक्तुपललतिलादकेभ्यः

बौधायनः । सर्वं भक्ष्यापूपकंदमूलमांसानि दंतैर्नावभिद्यात् । भक्ष्य चैनेव प्राप्ताव पू

यादीनां पृथगुपादानं दोषाधिक्यार्थं । लघुहारीतः । पृथक्पानं पुनर्दानं मांसेन पयसा

निशि । दंतच्छेदनमुष्णं च सप्त शक्तुषु वर्जयेत् । आपस्तंबः । सोत्तराच्छादनश्चैव य

ज्ञोपवीती भुंजीत कृत्स्नं ग्रासं ग्रसीत सांगुष्ठं न मुखशब्दं कुर्यात् न पाणिमवधूनुयात् एवं नात्र

नग्रासस्याद्देवाद्यवस्थितौ शानिविधानात् ग्रासशेषेन चाश्नीयादिति पात्रशेषपरं न

पिंडशेषपात्रमुत्सृजेत् इति बौधायनोक्तेः ग्रसितेन तु गृहीतस्य ग्रासस्यार्द्धेवोच्छिष्टस्थितो

विष्णुपुराणे । अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसं लवणाम्लौ तथा मध्ये कटुतिक्तादिकं राम ५८

स्ततः । प्राक् द्रवं पुरुषो श्नन्नवे मध्ये कठिनाशनः पुनरंते द्रवाशी च बलारोग्ये न मुंचति

ब्रह्मपुराणे कुर्यात्क्षीरांतमाहारं न च पश्चात् पिबेद्दधि जठरं पूरयेदर्द्धमन्नैर्भागं जलेन च

वापोः संचरणपीयचतुर्थ्यनवशेषयेत् ॥ अथ स्पृष्टिकं ॥ दधीतिपवेलोकविरोधः ॥ शातातपः ॥
विद्यमाने महस्तेनप्राणोशानदुर्बलः ॥ तोयं पिबति चक्रेण श्वा सो जायेत नान्यथा ॥ उद्धृत्य वा
महस्तेन यत्तोयं पिबति द्विजः ॥ सुरापानेन तत्तुल्यं मनुराह प्रजापतिः ॥ हस्तं सत्त्वाल्पगंडूषं यः पि
बेद्विचक्षणः ॥ स देवांश्च पितॄंश्चैव नृपास्तानेव घातयेत् ॥ बौधायनः ॥ भुंजानेषु तु विप्रेषु य
स्तु पात्रं परित्यजेत् ॥ भोजने विघ्नकर्त्ता च ब्रह्महा तथोच्यते ॥ पात्रत्यागो देशांतरगमनं ॥ न चेत
द्भुला[illegible]भोजनकाले पात्रधारणं पिचः ॥ अथवा नापजुहोती पजहीत वे [illegible]पस्तेन पात्रधारणा
धारणयोर्विकल्पविधानात् [illegible] पात्रधारणपूर्वकभोजनमारभ्य तदिदं वोध्यं ॥ स्पृष्टि
शातातपः ॥ दधि क्षीरघृते भुक्त्वा अम्लैर्व्यंजनैस्तथा ॥ उद्भोदकैर्वान्यचूर्णैः करौ सम
[illegible]शोधयेत् ॥ देवलः ॥ भुक्त्वा चामे [illegible] घ्येयो केन विधाने न समाहितः ॥ शोधयेन्मुख
हस्तौ च मृद्भिर्वा [illegible]तोकैरपि ॥ अस्यासम मुखवादिशोधयोर्यविक्रमवाधः ॥ बौधायनः ॥ नाति
[illegible]हितो मन्ता विधानमसौ [illegible] पादपः ॥ पीत्वाचांतः पुनराचम्य दक्षिणपादांगुष्ठे पाणिनिस्रा
वयेत् ॥ अंगुष्ठमात्रः पुरुषो अंगुष्ठं च समाश्रितः ॥ ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभु
क् ॥ भुक्तिस्थपः ॥ हस्तप्रक्षालनेनावनेजनं ब्रह्महा[illegible]मतोतरं ॥ तथा ॥ नासमत्स्यतितामधु
संस्पृष्टं [illegible] प्राश्याय उपस्पृशेत् [illegible]मभिस्पृशेत् ॥ ब्राह्मणो संवार्ड्य वाहूजान्वं [illegible]

आ० ९ भवेत् ॥ उत्कां चैव प्रतिश्रेत न चाप्याद्रेणपाणिना ॥ आचांतोप्यशुचिस्तावद्यावत्पात्रम
नुद्धृतं ॥ उद्धृतेप्यशुचिस्तावद्यावन्नोन्मृज्यते मही ॥ दक्षः ॥ उत्काच सुखमास्थाय तदंतं
परिणामयेत् ॥ इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत् ॥ अपरा मे लोकयात्रा चांतः
५७ याज्ञवल्क्यः ॥ उपास्य पश्चिमां संध्यां हुत्वाग्नींस्तानुपास्य च ॥ भृत्यैः परिवृतो भुक्त्वा
नातितृप्तोऽथ संविशेत् ॥ दक्षः ॥ प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत् ॥ याम
57 द्वयं शयानस्तु ब्रह्मभूयाय कल्पते ॥ एवं च प्रकल्प ॥ ब्रह्मपुराणे ॥ यदह्ना कुरुते पापं दृ
ष्ट्वा तन्निसमुच्यते ॥ यावत्सर्वे हृताराश्च चिरं मारात्रितादिवः ॥ तावंत्ते वत्तुवर्षाणि
जीवत्यभ्यधिकानि तु ॥ अभ्यधिकानि शतानि च ॥ अथ शयनविधिः ॥ अथ विष्णु
पुराणे ॥ ...पादादिशौचस्तु उत्कां सायं ततो गृही ॥ न छिद्रस्फुटितां शय्यामपि दारु
मयीं नृप ॥ नाविशालं न वा भग्नां नासमां मलिनां न च ॥ न च जंतुमयीं शय्यामध्यासीत
छेदनां स्वतो ॥ प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप ॥ सदैव स्वपतः पुंसो वि
परीतं तु रोगदं ॥ नंदिपुराणे ॥ नमो नंदीश्वरायेति प्रोच्य, यः सुप्यते नरः ॥ तस्य कूष्मां राम
डराजेभ्यो न भविष्यति वै भयं ॥ अत्र शातातपः ॥ नारमभीठोपधानेन न तिर्यक् कुत्सुदक्ऽत्य ५७
क् ॥ त्रिशरान नग्नो नाशुचिर्न चासने नोपतिष्ठेन्न प्रगे शातः ॥ अत्र शंखलिखितौ

न विशीर्णायां शय्यायां नान्यवर्णोपसेवितायामन भ्रुद्वान भतयत्तग्रशयतेन प्रतिवंशानं
वल्मीकमहावृक्षछायासु न पर्वणि न रम्यप्रसोत्सवे वेदयत्नी यत्र प्रतिपत्तं न दृश्ये: श्रो धि: ॥ उश
ना: नैतैलाभ्यक्तशिरा स्वपेत् ॥ पैठीनसि: ॥ नादीक्षित: नग्नो स्वप्यात् ॥ विष्णु ना
र्द्रपाद: स्वप्यान्नोत्तरापरशिरा न नग्नो नानुवंशं नाकाशे न पालाशे शयने न पंचदारुकृते
न गजभग्नकृते नाग्नि विद्युद्दग्धेन घटासिक्तद्रुमजेन श्मशाने न शून्यालये देवतायतनेषु
न चलच्चले न ... न गोगुरुद्विजाशकृद्रागानुपरि नो न दिवा स्वप्येत न संध्यायां न न स्नातो
देशेन च शून्ये न मूर्ध्नि न पर्वतमस्तके च अनुवंशं गृहमध्ये न काष्ठे देशानुगत: ॥ अथ दारोप
गमः ॥ नखापस्तंब: ॥ सदा निशायां दारान् प्रत्यलं कुर्वीत ॥ विष्णुपुराणे ॥ स्नात: स्रग्गंधधृ
क्प्रीतो नाध्मात: क्षुधितोऽपि वा सकाम: सानुरागश्च व्यवायं पुरुषो व्रजेत् ॥ व्यवायो मै
थुनं ॥ बृहस्पति: ऋतुकालाभिगमनं कुर्यात् पर्वर्तौ वर्जयेत् ॥ स्त्रिया शुक्राधिके स्त्रीस्या
त्पुमान् पुंसो स्त्राधिके भवेत् ॥ तस्मात् शुक्रविवृद्ध्यर्थं स्निग्धं च भोजयेत् ॥ लघ्वाशनं
स्त्रियं कुर्यादेवं संपादयेत्सुतांस्त्वतु कालाभिगमनं तु साकार्यं प्रयत्नत: ॥ सदैनापर्ववर्ज
स्त्रीणां गमनं हितम् ॥ पाराशर: ऋतुस्नानं तु यो भार्यां सन्निधौ नोपगच्छति

श्रा० द०

सगच्छेन्नरकं घोरं ब्रह्महेति च घोच्यते ॥ ऋतुस्नातां यो भार्यां सन्निधौ नोपिगच्छति ॥ घोरायां ब्रह्म
त्यायां युज्यते नात्र संशयः ॥ भार्यां ऋतुमुखे यस्तु सन्निधौ नोपगच्छति ॥ पितरस्तस्य मासं
५८ तस्मिन्रेतसि शेरते ॥ देवलः ॥ यः स्वदारानृतुस्नातां स्वस्थः सन्नोपगच्छति ॥ भ्रूणहत्या
58 मवाप्नोति गर्भे प्राप्य विनश्य सः ॥ स्वस्थो रोगादिरहितः ॥ बौधायनः ॥ त्रीणि वर्षाण्यृतुमन्तीं
यो भार्यां नाधिगच्छति ॥ स तुल्यं भ्रूणहत्यादोषमृच्छत्यसंशयं ॥ ऋतौ नोपैति यो भार्यां
मनृतौ यश्च गच्छति ॥ तुल्यमाहुस्तयोर्दोषमयोनौ यश्च सिंचति ॥ एतदकामविषयं सदैवे
वेति बृहस्पतिनाभिधानात् ॥ आपमनुः ॥ नोपगच्छेत्प्रमत्तोऽपि स्त्रियमार्तवदर्शने ॥
समानशयने चैव न शयीत तया सह ॥ रजसाभिप्लुतां नारीं नरस्य ह्युपगच्छतः ॥
प्रज्ञा यशो बलं चक्षुरायुश्चैव प्रहीयते ॥ तां विवर्जयतस्तस्य रजसा समभिप्लुतां ॥ प्रज्ञा
लक्ष्मीर्यशश्चक्षुरायुश्चैव प्रवर्द्धते ॥ इति नानास्मृतिसंवादात् ॥ ऋतुकालाभिगमने तु
नयमेयमः ॥ ऋतौ गच्छेदेव ऋतावेव गच्छेदिति नासदेवेति ॥ अनृतावपि त्वपर्वः पर्ववर्ज
मिति ॥ पर्वपदं निषिद्धकालोपलक्षणं स्त्रीणामभिमतं हि भवति दिति हेतुनिर्देशः (स्त्रियाः सका) श्रा० २
मत्वे रसार्थमनृतावपि गमनं नो चेदृतावेवेति व्यवस्थया विकल्पः ॥ याज्ञवल्क्यः ॥ राम
स्वास्थइंदौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान् ॥ तथा कामोऽशातु निशा स्त्रीणां तत्र मनु ५८

तासामायाश्चातस्तस्मानिद्रौ कादशी तथा अपोदरीं न शोचास्तुस्त्रशास्त्वादशरा। अपः शुद्ध..
शुद्धपुत्रा जायंते आयुग्मास्तु तथा स्त्रियः आपस्तंबः स्त्री वाससैव सन्निपातस्यात् यावत्स
न्नपात तथैव सहस्त्र स्यात ततो नानाउदको पस्पर्शो नमपिवालेपात् उक्ता त्वा च मय्रोदा
त्यागमानां स्त्रीवासः स्त्रीसंभोगार्थं वासः सन्निपातोभिगमः नानाभिन्नशय्ये त्यर्थः
उदकोपस्पर्शो नस्नानं एतच्च स्त्र्यनुगमनेऽपि नेति पश्चात्तरं अनन्तो तथा च वृद्धशाता
तपः स्त्रीणां तनगर्भे शंकिनां स्नानमैथुनिनः स्मृतं अनन्तो तु सदा कार्यं शौचं मृ
त्पुरीषवत् इति गौतमः नम्नि शुनी मयशौचं स्त्री। विलं वेद शौचमत्रलेपन
गंधापकर्षणं इति शुद्धानुगमनेन स्नानं पूर्वोक्तकर्मादिकारापादकं ननु चोडालादिस्प
र्शालनमात्रं स्त्र्यनुगमने च स्नानं पूर्वोक्तकर्माधिकारापादकं ननु चोडालादिस्प
र्शवत् स्त्र्यनुगमनेनाप्रयत्नं लभ्यते तच्च स्नानेनापनीयते येन राजानपि स्नानं स्ना
ते। अपतः शातरेवेति वृद्धः वृद्धशातातपः भावेताव स्त्वच्छी स्यातां दंपती शयनं गतो
शयनादुत्थिता नारी शुचिस्स्यादशुचिः पुमान् शुचिः स्नानप्रोक्ततो विनापि न तुले
पत्नाल नागमननिरुह निरित्याह विष्णुपुराणे नास्नातां तु स्त्रियं गच्छेन्नातुरां न र
जस्वलां नानिष्टां न प्रकुपितां नाप्रशस्तां न गर्भिणीं नादक्षिणां नान्यकामां नाकाम्यां
नान्यगोत्रिणीं क्षुत्क्षामां नातिभुक्तां वा स्वयं चेभिर्गुणैर्युतः नान्यथा नावयो नौका

नोपयुक्तोग्निसूना देवद्विजगुरूणां चच्छायांनाक्रमेभवेत् ॥ चैत्यचत्वरसीरेषु त
थैव च चतुःपथे ॥ नैव श्मशाने नोपवने सलिलेषु महीपते ॥ प्रोक्तपर्वस्व शेषेषु नैव भू
पाल संध्ययोः ॥ गच्छेद्व्यवायं मतिमान्मूत्रोच्चारप्रपीडितः ॥ प्रोक्तपर्वसु ॥ चतुर्दश्य
ष्टमी चैव अमावास्याथपूर्णिमा पर्वाण्येतानि राजेंद्र रविसंक्रांतिरेव चेति स्लो
लोकेषु ॥ वामनपुराणे ॥ बुधेनैव योषां न समाचरेत् ॥ तथा स्त्रीणां युग्योषित्परि
वर्जनीया तथा योषिन्मद्यादिक्रतिकपोचरासु ॥ अत्र याज्ञवल्क्यः ॥ मघाम्
लांश्च वर्जयेत् ॥ वसिष्ठः ॥ न मलिन वाससा सह संवसेत् ॥ न रजस्वलया ना
योग्यया ॥ संवासोत्र मैथुनं ॥ अयोग्या अशक्तयोवना ॥ विष्णुः ॥ नजाद्वंद
दन्तो नभुक्त्वा नाम्भेत्रितः श्राद्धे ॥ नव्रती न दीक्षितो न देवायतने श्मशानशून्या
यतने सु न वृक्षमूले ॥ न दिवा न संध्ययोः ॥ न मलिनां नाभ्यक्तां नाभ्यक्तो न रोगा
र्तां न रोगार्त्तो न हीनांगीं नाधिकांगीं ॥ न वयोधिकां नोपेयात् गर्भिणीं नारीं
दीर्घमायुर्जिजीविषु ॥ वसिष्ठः ॥ अपि च पाठके प्रवचनमै नेविज्ञापते